नं: १६४-घ

सिद्धान्तकौमुदी पूर्वार्द्धम्

पत्राणि ६५

33/5

नं० १६४ - च

सिद्धान्त कौमुदी पूर्वार्द्धम्

पत्राणि ६५

सिद्धांतकौमुदीपूर्वार्थम्

नं० १६४

तिवत्तोर्नुक पत्तयोर्नुक स्यात स्त्रियां ऋन्नेतिङीप् गर्भिण्यां जीवत्भर्तृकायां च प्रकृतिभावो नि
पात्यते तत्रान्तर् वत्स्यां गर्भ इति विग्रहे अंतःशब्दस्याधिकरणशक्तिप्रधानतया अस्तिसा
मानाधिकरण्याभावात् प्राप्ते मतुप्निपात्यते पतिवत्नीत्यत्र तु वत्वं निपात्यते अंतर्वत्नी प
तिवत्नी प्रत्युदाहरणं तु अन्तरस्त्यस्यां शालायां घटः पतिमती पृथिवी पत्युर्नो यज्ञसंयो
२५ गे पतिशब्दस्य नकारादेशः स्याद्यज्ञेन संबंधे वसिष्ठस्य पत्नी तत्कर्तृकयज्ञस्य फलभोक्त्री
त्यर्थः दंपत्योः सहाधिकारात् विभाषा सपूर्वस्य पतिशब्दान्तस्य सपूर्वस्य प्रातिपदिकस्य
नो वा स्यात् गृहस्य पतिः गृहपतिः गृहपत्नी अनुपसर्जनस्येति होत्तरार्थमनुवृत्तमपि
न पत्युर्विशेषणं किन्तु तदन्तस्य तेन बहुव्रीहावपि दृढपत्नी दृढपतिः वृषलपत्नी वृष
लपतिः अयं वृषलस्य पत्नीति व्यस्ते कथमिति चेत् पत्नीव पत्नी त्युपचारात् यद्वा आ
चारक्विबंतात्कर्तरि क्विप् अस्मिंश्च पक्षे पत्नियो पत्नियतीयड्ढि षष्ठे विशेषः सपूर्वस्य किं
गवां पतिः स्त्री नित्यं सपत्न्यादिषु सर्वविकल्पापवादः समानस्य सभावोपि निपात्यते ॥
समानः पतिर्यस्याः सा सपत्नी एकपत्नी वीरपत्नी पूतक्रतोरै च इयं त्रिसूत्री पुंयोगाएवेष्यते

सिकौ
५७
५७

पूतक्रतोः स्त्री पूतक्रतायी ययाक्रतवः पूताः पूतक्रतुरेषा वृषाकप्यग्निकुसितकुसिदा
नामुदात्तः एषामुदात्त ऐआदेशः स्यान्ङीप् च वृषाकपेः स्त्री वृषाकपायी हरविष्णू वृषा
कपीत्यमरः वृषाकपायी श्रीगौर्योरिति च अग्नायी कुसितायी कुसिदायी कुसिदो व्याजः
कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्यः मनोरौ वा मनुशब्दस्यौकारादेशः स्यादुदात्तैकारश्च
वा ताभ्यां सन्नियोगशिष्टो ङीप् च मनोः स्त्री मनायी मनावी मनुः वर्णादनुदात्तात्तोपधात्तो नो॰
नः वर्णवाची योनुदात्तान्तस्तोपधस्तदन्तादनुपसर्जनात्प्रातिपदिकाद्वा ङीप् स्यात्तकारस्य
नकारादेशश्च एनी एता रोहिणी रोहिता वर्णानां तणतिनितान्तानामिति फिट्सूत्रेणा
द्युदात्तः त्रेण्या च शलल्येति ह्रस्वम् त्रीण्येतान्यस्याऽऽ इति बह्वृचः अनुदात्तात्किम् श्वे
ता घृतादीनां चेत्यन्तोदात्तोयम् अत इत्येव शितिः स्त्री पिशंगादुपसंख्यानं पिशंगी पि
शंगा असितपलितयोर्न असिता पलिता छन्दसि क्नमेके असिक्नी पलिक्नी अवदा
तशब्दस्तु न वर्णवाची किंतु विशुद्धिवाची तेनावदातेत्येव अन्यतो ङीष् तोपधभिन्नव
र्णवाचिनोऽनुदात्तान्तात्प्रातिपदिकात्स्त्रियां ङीष् स्यात् कल्माषी सारंगी लघावन्ते द्वयोश्च ५७

बव्हचोऽतः इति मध्योदात्तावेतौ अनुदात्तादिं किं हंसाकपिला षिद्गौरादिभ्यश्च षिद्गौरा
दिभ्यश्च ङीष्स्यात् नर्तकी गौरी अनडुही अनड्वाही पिप्पल्यादयश्च आकृतिगणो
यम् सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः भस्योपधायायस्य लोपः स्यात्स चेद्यः सूर्या
ह्यवयवः मत्स्यस्य ङ्यां सूर्यागस्त्ययोश्छे च ङ्यां च तिष्यपुष्ययोर्नक्षत्राणि यलोप इति
वाच्यं मत्सी मातरीपित्रोरिति पितरादिव सिद्धे गौरादिषु मातामहीशब्दपाठात् नित्यः षित्वा
ङीषु ङंप्रा जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद् वृत्त्यमत्रावपना
नाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु एकादशभ्यः प्राति
पदिकेभ्यः क्रमाद्वृत्त्यादिष्वर्थेषु ङीष्स्यात् जानपदी वृत्तिश्चेत् अन्या तु जानपदा उत्सा
दित्वादञ्तत्वेन टिड्ढेति ङीप्स्यादुदात्तः कुण्डी अमत्रं चेत् कुण्डान्या कुण्डदाहे गुणश्च
हलन्तत्वप्रत्ययः यस्य अमत्तेजावत्तः ऊङ् इति मन्त्र पुजातिवचनस्य तो जातिलक्षणो ङी
प्रवर्तेव अमत्रेहि स्त्रीविषयता रामाङीष् सिद्धीयेत न तु नियमार्थे गोणी आवपनं चेत्
गोणान्या स्थली अकृत्रिमा चेत् स्थलान्या भाजी श्राणा चेत् भाजान्या नागी स्थूला चेत्

सिको॰
५८

नागान्या गजवाची नागाश्च : स्यौत्रगुणयोगादन्यत्र प्रयुक्तः उदाहरणं सर्पवाची तु दैत्यां
गुणादन्यत्र प्रयुक्तः प्रत्युदाहरणं कालीवर्णश्चेत् कालान्या नीली अनाच्छादनं चेत्
नीलान्या नील्याः रक्ताः शाटी त्यर्थः नीलाद्यनत्वतः व्वाड त्वान् अनाच्छादने पि न स
र्वत्र किं तु नीलादौषधौ नीली प्राणिनि च नीली गौः संज्ञायां वा नीली नीला कुणादिश
यो विकारश्चेत् कुणान्या कामुकी मैथुनेच्छा चेत् कामुकान्या कवरी केशानां सन्निवि
विशेषः कवरान्या चित्रेत्यर्थः शोणान्या चा शोणी शोणा वोतो गुणाद्वचनात् उक्तादुण
वाचिनो वा ङीष् स्यात् मृद्वी मृदुः उतः किं शुचिः शुचिरिति किं आखुः खरुसंयोगो
पधान्न खरुः पति वा कन्या पाण्डुः बहुलादिभ्यश्च पक्षे वा ङीष् बह्वी बहुः पद्धती प
द्धतिः कृदिकारादक्तिनः शुचिः रात्री सर्वतोऽक्तिन्नर्थादित्येके शकटी शकटिः अ
क्तिन्नर्थात् किं अजननिः क्तिन्नन्त वारः प्रमेविधायंश पद्धतिप्रागुक्तोगणो पद्धते पद्धती
पद्धतिः हिमकाषिहृति षु चे त्रिपङ्क्तावः पुंयोगादाख्यायां या पुमाख्या पुंयोगात् स्त्रि
यां वर्तते ततो ङीष् स्यात् गोपस्य स्त्री गोपी पालकान्तान्न गोपालिका अश्वपालिका स ५८

याद्देवतायांचापवाच्यः सूर्यस्यस्त्रीदेवतासूर्या देवतायांकिं सूरी कुन्तीमानुषीयं इन्द्रवरुणभ
वशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् एषामानुगागमः स्यान्ङीष् इन्द्रादीनां
यस्त्रीमातुलाचार्ययोश्चपुंयोगएवेष्यते तत्र ङीषिसिद्धेआनुगागममात्रंविधीयते इतरेषांचतुर्णा
मुभयं इन्द्राणी हिमारण्ययोर्महत्वे महद्धिमं हिमानी अरण्यानी यवाद्दोषे दुष्टोयवोयवानी
यवनाल्लिप्यां यवनानांलिपिर्यवनानी मातुलोपाध्याययोरानुक्वा मातुलानी मातुली उपाध्याया
नी उपाध्यायी यात्तुस्वयमेवाध्यापिका तत्रवाङीप् वाच्यः उपाध्यायी उपाध्याया आचार्यादणत्वं
च आचार्यस्यस्त्री आचार्यानीपुंयोगइत्येव आचार्या स्वयंव्याख्यात्री अर्यक्षत्रियाभ्यांवास्वार्थे
अर्याणी अर्या स्वामिनीवैश्यावेत्यर्थः क्षत्रियाणी क्षत्रिया पुंयोगेतु अर्यी क्षत्रियी कथंब्र
ह्माणीति ब्रह्माणमानयतिजीवयतिकर्मण्यण् क्रीतात्करणपूर्वात् क्रीतांतात्करणादेःस्त्रियां
ङीष्स्यात् वस्त्रक्रीती क्वचिन्न धनक्रीता क्तादल्पाख्यायाम् करणादेःक्तांतादस्मात्ङीष्स्यात्
जातिपूर्वादितिवक्तव्यम् तेनबहुनन्सुकालसुखादिपूर्वान्न ऊरुभिन्नी नेह बहुक्रीता जाता
न्तान्न इतजातापाणिगृहीतीभार्यायां पाणिगृहीतान्या असंज्ञायाम्बह्वपरा ज्ञा स्वैणानित्यप्रामवि
कल्पायं,

सि॰कौ॰
४९
49

सुरापीती सुरापीता अंतोदात्तात्किं वस्त्रच्छिन्ना अजाकादत्वनादित्युदात्तनिषेधः अतएव पूर्वेणापि
नङीष् स्वांगाच्चोपसर्जनादसंयोगोपधात् असंयोगोपधमुपसर्जनं यत्स्वांगं तदंतादतंतात्प्रातिपदि
काङ्ङीष्वा स्यात् केशानतिक्रांता अतिकेशी अतिकेशा चन्द्रमुखी चन्द्रमुखा असंयोगोपधात्किं सुगु
ल्फा उपसर्जनात्किं शोभना शिखा सुशिखा स्वांगं त्रिधा अद्रवं मूर्तिमत्स्वांगं प्राणिस्थमविकारजं
सुस्वेदा द्रवत्वात् सुज्ञाना अमूर्तिमत्वात् सुमुखा शाला अप्राणिस्थत्वात् सुशोफा विकारजत्वा
(अप्राणिस्थं प्राणिनि)
त् अतत्स्थं तत्र दृष्टं च सुकेशी सुकेशा वा रथ्या अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात् तेन चेत्तत्तथा
युतं सुस्तनी सुस्तना वा प्रतिमा प्राणिवत् प्राणिसदृशे स्थितत्वात् नासिकोदरौष्ठजंघादंत
कर्णशृंगाच्च एभ्यो वा ङीष् आद्ययोर्बह्वच्लक्षणो निषेधो बाध्यते इतरेषु उपवादत्वात् ओष्ठादीनां पंचा
नां तु असंयोगोपधादिति बाध्यते मध्येपवादन्यायेन सहनञ्विद्यमानस्तु प्रतिषेधः पराद्बाधका
तुंगनासिकी तुंगनासिका इत्यादि नेह सहनासिका अनासिका अत्र वृत्तिः अंगगा
त्रकंठेभ्यो वक्तव्यम् स्वंगी स्वंगेत्यादि एतच्चानुक्तसमुच्चयार्थेन चकारेण संग्राह्यमिति के
चित् भाष्याद्यनुक्तत्वादप्रमाणमिदमिति प्रामाणिकाः अत्र वार्त्तिकानि पुच्छाच्च सुपुच्छा ४९

मध्येपवादाः सन्नि
कृष्टान्विधीन्बाधन्ते
न विप्रकृष्टान्

स्पृक्की कबरमणिर्विषशरेभ्यो नित्यं कबरं चित्रं पुच्छं यस्याः सा कबरपुच्छीत्यादि उपमानात्पक्षाच्च
पुच्छाच्च ॥ नित्यमित्येव उलूकपक्षी शाला उलूकपुच्छी सेना नक्रोडादिबह्वचः क्रोडादेर्बहु
चश्च स्वाङ्गान्न ङीष् कल्याणक्रोडा अश्वानामुरः क्रोडा। आकृतिगणोऽयं सुजघना सहनञ्वि
द्यमानपूर्वाच्च सहेत्यादि त्रिकपूर्वान्न ङीष् सकेशा अकेशा विद्यमाननासिका नखमुखात्सं
ज्ञायाम् न ङीष् स्यात् शूर्पणखा गौरमुखा संज्ञायां किं ताम्रमुखी कन्या दिक्पूर्वात ङीप् दिक्पूर्वपदात्स्वा
ङ्गान्तात्प्रातिपदिकात्स्यान्ङीषो वा दिशः स्यात् प्राङ्मुखी आद्युदात्तं पदं वाहः वाहन्तात्प्रातिप
दिकान्ङीष् ङीषेवानुवर्तते न ङीष् दित्यवाह्भ्मदित्यौही चम सख्यशिश्वीति भाषायां इति पाठः
स्त्रियां गतं चन मकारो भाषायामित्यस्मानन्तरं ङ्भवः तेन ङ्कस्त्यपि क्वचित् सखी अशिश्वी आधेन बोधुनर्यं त्ता
सर्वभाक् अशिश्वी जातेरस्त्रीविषयादयोपधात् जातिवाचि यन्न च स्त्रियां नियमयोपधं ततः स्त्रियां ङीष् स्यात् आ न्
कृतिग्रहणा जातिः अनुगतसंस्थानव्यंग्येत्यर्थः तटी सुकरस्यात निग्रोह्या असर्वलिङ्गत्वे सत्येक
स्यां व्यक्तौ कथनाद्ग्राह्यां तं ततो कथनं विनापि सुग्रहा जातिरिति दाणान्तरम् वृषली मतं तत्किं शुन्ना ॥
सकृदित्यादि किं देवदत्ता गोत्रं च चरणैः सह अपत्यप्रत्ययान्तः शाखाध्येतृवाची च शब्दो जातिका

सिकौ. ५

50

यैल्लभतेऽत्रार्थः औपगवी कठी ब्राह्मणी कलुंची तत्रत्व शार्ङ्गरवादियाताङ्गीनाडी बाधते जातेः किं
मुण्डा अस्त्रीविषयात्किं बलाका अयोपधात्किं क्षत्रिया योपधप्रतिषेधे गवयहयमुकयमनुष्यम
त्स्यानामप्रतिषेधः गवयी हयी मुकयी हलस्तद्धितस्येति यलोपः मनुषी मत्स्यस्य ङ्यां मत्सी पा
ककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपि ङीष्णा ओ
दनपाकी शंकुकर्णी शालपर्णी शंखपुष्पी दासी फली दर्भमूली गोवाली ओषधिविशेषे रूढा एते।
इतोमनुष्यजातेः ङीष्स्यात् दाक्षी योपधादपि उदमेयस्यापत्यम् औदमेयी मनुष्येति किं तित्तिरिः।
ऊङुतः उकारान्तादयोपधान्मनुष्यजातिवाचिनः स्त्रियामूङ् स्यात् कुरूः कुरुनादिभ्यो ण्यः तस्य।
स्त्रियामवंत्यादिना लुक् अयोपधात्किं अध्वर्युर्ब्राह्मणी अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानं
रज्ज्वादिपर्युदासाश्रुकुर्वीत्तिभव्व अलाबू कर्कंधू अनयोर्दीर्घान्तत्वेपि नाङ् धातोरिति विभक्तुरा
न्तत्वप्रतिषेधः ऊङः फलं प्राणिजातेस्तु कृकवाकुः रज्ज्वादेस्तु रज्जुः हनुः बाह्वन्तात्संज्ञायां स्त्रि
यामूङ् भद्रबाहूः संज्ञायां किं वृत्तबाहुः पंगोश्च पंगूः श्वशुरस्योकाराकारलोपश्च चादूङ्
पुंयोगलक्षणस्य ङीषोऽपवादः लिङ्गविशिष्टपरिभाषया स्यादयः श्वश्रूः ऊरूत्तरपदादौपम्ये ॥ ५०

उपमानवाचिपूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् स्यात् करभोरूः संहितशफलक्षणवा
मादेश्च। अनौपम्यार्थमिदं संहितोरूः सेवशफोरूः शफौ खुरौ ताविव संश्लिष्टत्वादुपचारात् लक्षणाच्छन्दृष्टी
ग्राह्या च लक्षणोरूः वामोरूः सहितेन सह भावेति वक्तव्ये हितेन सह सहितौ ऊरू यस्याः सा सहितो
रूः सहेतेनुतिसहौ। ऊरू यस्याः सा सहोरूः यद्वाविद्यमानवचनः सहशब्दः सहसऊर्वतिशय प्रतिपादन
यप्रयोगः संज्ञायां कद्रुकमण्डल्वोः सहासामूङ्। कद्रूः कमण्डलूः संज्ञायां किं कद्रुः कमण्डलुः अच्छन्दोर्थ
वचनं शार्ङ्गरवाद्यञो ङीन् शार्ङ्गरवादेरञोऽकारान्तस्य जातिवाचिनो ङीन् स्यात् शार्ङ्गरवी वैदी जात
रित्यनुवृत्तेर्प्रयोगे ङीबेव नृनरयोर्वृद्धिश्चेति गणसूत्रं नारी यङश्चाप् यङन्तात्स्त्रियां चाप्स्यात् आ
म्बष्ठ्या सामान्यग्रहणं आम्बष्ठ्या कारीषगंध्या वाराह्या बालाक्या। वेति माष्या आवट्याश्च अस्मा
च्चाप् स्यात् यश्चेति ङीषोपवादः आवट्याद्गर्गादिः आवट्या तद्धिताः आपस्मात् सर्वस्यापधिका
रोयम् यूनस्तिः युवन्शब्दात्तिप्रत्ययः स्यात् स च तद्धितः लिंगविशिष्टपरिभाषयासिद्धे ङीबाधिका
रउच्चरार्थः युवतिः अनुपसर्जनादित्येव बहवोयुवानो यस्यां सा बहुयुवा युवतीतियोतेः शत्रन्तान्ङीपितिमाध
धम्॥ ७॥ इति स्त्रीप्रत्ययाः॥ ७॥ प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा नियः
तोपस्थितिकः प्रातिपदिकार्थः मात्रशब्दस्य प्रत्येकं योगः प्रातिपदिकार्थमात्रे लिंगमात्राद्याधिक्ये संख्यामा
त्रे च प्रथमा स्यात् उच्चैः कृष्णः श्रीः ज्ञानं अलिंगा नियतलिंगाश्च प्रातिपदिकार्थ इत्यस्योदाहरणं
यस्मिन्प्रातिपदिके उच्चार्यमाणे सति यस्यार्थस्य नियमे
नोपस्थितिः स प्रातिपदिकार्थः २

(margin notes:)
मात्रकार्त्स्न्येऽवधारणे इत्य
मरः
ग
अर्थयतीति
अर्थवत्त्वं किं नाम वृत्तिमत्त्वं अर्थवत्त्वं
वृत्तिर्द्विधा शक्तिर्लक्षणा
उ न र अर्थवैकार्थी प्रवीन लौकिके प्रयोगे अयमर्थः
नवीन मतेनेत्यत्र फलत विभक्तीनं समभिव्याहारान्त
सा लोकेर्थबोधजनकत्वं अवयवशक्तिमत्त्वम्

51

सि॰ कौ॰ का॰ प्र॰ प॰

अनियतलिंगात्तु लिंगमात्राधिक्यस्य तटः तटी तटं परिमाणमात्रे द्रोणो व्रीहिः द्रोणात्मकं परिमाणं तत्परिच्छि
न्नव्रीह्यर्थः प्रत्ययार्थपरिमाणे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम् प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन
व्रीहौ विशेषणमिति विवेकः वचनं संख्या एकः द्वौ बहवः इहउक्तार्थत्वाद्विभक्तेरप्राप्तौ वचनात् सैवा
धनेव इह प्रथमा स्यात् हेराम कारके इत्यधिकृत्य कर्तुरीप्सिततमं कर्म कर्तुः क्रियया प्राप्तुमिष्टतमं कार
कं कर्मसंज्ञं स्यात् कर्तुः किम् माषेष्वश्वं बध्नाति कर्मण ईप्सिततमा माषा न तु कर्तुः तमप् ग्रहणं किं पयसा ओदनं भुं ४
नक्ति कर्मेत्यनुवृत्तौ कर्मग्रहणमाधारनिवृत्त्यर्थं अन्यथा गेहं प्रविशतीत्यत्रैव स्यात् अनभिहिते इत्य हि
धिकृत्य कर्मणि द्वितीया अनुक्ते कर्मणि द्वितीया स्यात् हरिं भजति अभिहिते तु कर्मणि प्रथमा तिङ्कृत्तद्धिता
र्थमात्र इति प्रथमैव अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः तिङ् हरिः सेव्यते कृत् लक्ष्म्या सेवितः तद्धितः
शतेन क्रीतः शत्यः शतिकः समासः प्राप्त आनन्दो यं प्राप्तानन्दः क्वचिन्निपातेनाभिधानं यथा विषवृक्षोऽपि सं
वर्ध्य स्वयं छेत्तुमसाम्प्रतमित्यत्र हि युज्यत इत्यर्थः तथायुक्तं चानीप्सितम् ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि का त
रकं कर्मसंज्ञं स्यात् ग्रामं गच्छन् तृणं स्पृशति ओदनं भुञ्जानो विषं भुङ्क्ते अकथितं च अपादानादिविशेषैरविवक्षितं कारकं कर्म
संज्ञं स्यात् दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम् दुहा
दीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्मेति परिगणनं कर्तव्यमित्यर्थः
गां दोग्धि पयः बलिं याचते वसुधां अविनीतं विनयं याचते तण्डुलानोदनं पचति गर्गान् शतं दण्डयति व्रजमव

यस्मात् दातुं कामयते तेन तत्सुखं सुखविस्तारभूते गोत्वं = गाः पयो दुग्धे = गौः पयो दुग्धा
बलिर्वसुधां याचते बलिर्वसुधां याचितः
अविनीतः विनयं याचते अविनीतः विनयं याचितः
तण्डुला ओदनं पच्यन्ते तण्डुला ओदनं पाचिताः
गर्गाः शतं दण्ड्यन्ते गर्गाः शतं दण्डिताः
व्रजे गौरवरुध्यते व्रजे गौरवरुद्धा

माणवकात् पंथाः पृच्छ्यते देवदत्तः शतं मुष्णाति वृक्षात् फलानि अवचीयंते
माणवकात् पंथाः पृष्टः देवदत्तः शतं जितो वा वृक्षात् फलानि अवचितानि
माणवकाय धर्म उच्यते (ब्रवीति) शिष्यते माणवकाय धर्म उक्तः शासितो वा
ग्राममजा नीयते
रूद्धा
लक्षार्थं गां स्थिति ... हरिं दायम ... जीवतु मरणं ... शपथं नीलं ... कर्मकं ... हृ: ४३
देवः शतं जीयते
देः ... जितः

मथ्यते मथितो वा =
क्षीरधिः सुधा

रुणद्धि गां माणवकं पंथानं पृच्छति वृक्षमवचिनोति फलानि माणवकं धर्मं ब्रूते शास्ति वा शतं जयति देवदत्तं सुधां
क्षीरनिधिं मथ्नाति देवदत्तं शतं मुष्णाति ग्राममजां नयति हरति कर्षति वहति वा अर्थनिबंधनेयं संज्ञा बलिं भिक्षु
ते वसुधां माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि कारकेति माणवकस्यापि तत्र पंथानं पृच्छतीति अकथिता
भियोगे हेतुः का लोभावगतत्वाधाच्चकर्मसंज्ञक इति वाच्यं कुरून्स्वपिति मासमास्ते गोदोहमास्ते क्रो
शमास्ते गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ गत्यर्थानां शब्दकर्मकाणामकर्मका
णां चाणौ यः कर्ता स णौ कर्म स्यात् शत्रूनगमयत्स्वर्गं वेदार्थं स्वानवेदयत् आशयच्चामृतं देवान् वेदमध्या
पयद्विधिं आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः ॥ गतीत्यादि किं पाचयत्योदनं देवदत्तेन अणौ किं
गमयति देवदत्तो यज्ञदत्तं तमपरः प्रयुंक्ते गमयति देवदत्तेन यज्ञदत्तं विष्णुमित्रः नीवह्योर्न नाययति वाहय
ति वा भारं भृत्येन नियंतृकर्तृकस्य वहेरनिषेधः वाहयति रथं वाहान् सूतः आदिखाद्योर्न आदयति खादय
ति वान्नं वटुना भक्षेरहिंसार्थस्य न भक्षयत्यन्नं वटुना अहिंसार्थस्य किं भक्षयति बलीवर्दान् सस्यं जल्पतिप्र
भृतीनामुपसंख्यानं जल्पयति भाषयति वा धर्मं पुत्रं देवदत्तः दृशेश्च दर्शयति हरिं भक्तान् सूत्रे ज्ञा
नसामान्यार्थानामेव ग्रहणं न तु तद्विशेषार्थानामित्यनेन ज्ञाप्यते तेन स्मरति जिघ्रति आदीनां न स्मारयति
घ्रापयति देवदत्तेन शब्दाययतेर्न शब्दाययति देवदत्तेन धातोरर्थसंगृहीतकर्मत्वेनाकर्मकत्वात् मासादिभिः येषां दे
शकालादिभिन्नं कर्म न संभवति ते ऽकर्मका न त्वविवक्षितकर्माणो ऽपि तेन मासमासयति देवदत्तमित्यादौ

रुध्यते उपरुद्धो कृष्टा
अत्र संबंधषष्ठी = १ संबंध सामान्यकारकत्वाभिधायो गाभावात् =
विधि वेदं अध्येतुं विधिं वेदमध्यापयत् = ५
सलिले पृथ्वीं आसीनां पृथ्वीं सलिले आशयत् =
शत्रवः भाजं गमयते ... तेनुस्तेन भारं नाय यति वा हरति वा गति बुद्धि ... = ४
धातोरर्थं गत्यर्थ अवगतः ... धीबुद्ध्यर्थानां प्रत्यव ... न प्रसिद्धेः विवक्षात कर्मत्वे कर्मकाक्रि या = २
वाहाः रथं वहंति तान् वाहान् सूतः रथं वाह यति = ६

आगमन्नात्रूनलोवा पारः दिंसा = ५
शत्रवः स्वर्गमगच्छन् तान् शत्रून् स्वर्गमगमयत् = १
स्वे वेदार्थमविदुः तान् स्वान्वेदार्थमवेदयत् = २
देवाः अमृतमश्नन् तान् देवान् अमृतमाशयत् =
बलीवर्दाः सस्यमभक्षन् तान् बलीवर्दान् सस्यं भक्षयति
पुत्रः धर्मं जल्पति वा भाषति तं पुत्रं देवदत्तः धर्मं जल्पयति भाषयति
इन्द्रियार्थानां = २
भक्ताः हरिं पश्यति तान् भक्तान् गुरुः हरिं दर्शयति =
कर्मकः =

भृत्यः कटं करोति वा करोति तेन भृत्येन कटं कारयति वा कारयति		द्रष्टा भक्तः देवं अभिवदते पश्यति वा तेन भक्तेन देवं अभिवादयते दर्शयते व

का॰ वि॰ अ॰
सि॰ कौ॰
५२

कर्मत्वं भवति देवदत्तेन पाचयतीत्यादौ तु न हृक्रोरन्यतरस्यां हृक्रोः णौ कर्तृ पक्षे यौ वा कर्म स्यात् हार
यति कारयति वा भृत्येन भृत्यं वा कटं अभिवादिदृशोरात्मनेपदे वेति वाच्यं अभिवादयते दर्शयते देवं
(द्रष्टा तेन) भक्तेन भक्तं वा अधिशीङ्स्थासां कर्म अधिपूर्वाणामेषामाधारः कर्म स्यात् अधिशेते अ
धितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः अभिनिविशश्च अभिनिपूर्वस्य विशोऽप्याधारः कर्म स्यात्
अभिनिविशते सन्मार्गं परिक्रयणे संप्रदानमिति सूत्रादिह मण्डूकप्लुत्यान्यतरस्यामित्यनुवर्त्य व्यव
स्थितविभाषाश्रयणात् क्वचिन्न पापेऽभिनिवेशः उपान्वध्याङ्वसः उपादिपूर्वस्य वसतेराधारः कर्म स्यात् (व्रतं करोतीत्यर्थः)
उपवसति अनुवसति अधिवसति आवसति वा वैकुण्ठं हरिः अभुक्त्यर्थस्य न वने उपवसति उभसर्वतसोः
कार्या धिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते उभयतः कृष्णं गोपाः सर्वतः कृष्णं धिक् कृ
ष्णाभक्तं उपर्युपरि लोकं हरिः अध्यधि लोकं अधोऽधो लोकं अभितः परितः समया निकषा हा प्रतियोगेऽ
पि अभितः कृष्णं परितः कृष्णं ग्रामं समया निकषा हा कृष्णाभक्तं तस्य शोच्यतेत्यर्थः अतेरु विना किंचित्
बुभुक्षितं न प्रतिभाति किंचित् अन्तरान्तरेण युक्ते आभ्यां योगे द्वितीया स्यात् अन्तरा त्वां मां हरिः अन्तरे
ण हरिं न सुखं कर्मप्रवचनीयाः इत्यधिकृत्य अनुर्लक्षणे लक्षणे द्योत्येऽनुः कर्मप्रवचनीयसंज्ञः स्यात् गत्युप ५२

यानेनः

उपसर्गाः क्रियायोगे गतिश्च =

सर्गसंज्ञापवादः कर्मप्रवचनीययुक्ते द्वितीया एतेन योगे द्वितीया स्यात् जपमनु प्रावर्षत् हेतुभूत
जपोपलक्षणमित्यर्थः परापि हेतौ तृतीयाऽनेन बाध्यते लक्षणेत्थंभूतेत्यादिना सिद्धे पुनः संज्ञाविधानसा
मर्थ्यात् तृतीयार्थे अस्मिन्द्योत्येऽनुः कर्मसंज्ञः स्यात् नदीमन्ववसिता सेना नद्या सह संबद्धेत्यर्थः हीने
धनेनः हीने हीनेद्योत्येऽनुः प्राग्वत् अनुहरिं सुराः हरेर्हीना इत्यर्थः उपोऽधिके च अधिके हीने च द्योत्ये
उपेत्ययं प्राक्संज्ञः स्यात् अधिके सप्तमी वक्ष्यते हीने उपहरिं सुराः लक्षणेत्थंभूताख्यानभागवीप्सा
सु प्रतिपर्यनवः एष्वर्थेषु विषयभूतेषु प्रत्यादयः उक्तसंज्ञाः स्युः लक्षणे वृक्षं प्रति परि अनु वा विद्योत
ते विद्युत् इत्थंभूताख्याने भक्तो विष्णुं प्रति परि अनु वा भागे लक्ष्मीर्हरिं प्रति परि अनु वा हरेर्भाग इत्यर्थः वीप्सा
यां वृक्षं वृक्षं प्रति परि अनु वा सिंचति अत्रोपसर्गत्वाभावान्न षत्वं एषु किं परिषिंचति अभिरभागे भागवर्जे लक्ष
णादावभिः कर्मसंज्ञः स्यात् हरिमभि वर्तते भक्तो हरिमभि देवं देवमभि सिंचति अभागे किं यदत्र ममाभि
ष्यात् तद्दीयतां अधिपरी अनर्थकौ उक्तसंज्ञौ स्तः कुतोऽध्यागच्छति कुतः पर्यागच्छति गतिसंज्ञाबाधात्
निर्गतौ विति निघातो न सुः पूजायां सुः सिक्तं सुस्तुतं अनुपसर्गत्वान्न षः पूजायां किं सुसिक्तं किं तवात्र
ह्येणायं अतिरतिक्रमणे च अतिक्रमणे पूजायां चातिः कर्मप्रवचनीयः स्यात् अति देवान् कृष्णः अपिः
पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु एषु द्योत्येष्वपिः कर्मसंज्ञः सर्पिषोऽपि स्यात् सर्पिषो बिन्दुरपि इत्य
संभावनायां लिङ् तस्या एव विषयभूते भवने कर्तृदोर्लभस्य युक्ते सोर्लभ्यं द्योतयन्नपिशब्दः स्यादिति नेन संबध्यते सर्पिषः इति षष्ठी तु
अपिशब्दबलेन गम्यमानस्यावयवावयविभावसंबंधे इयमेव ह्यपिशब्दः पदार्थद्योतकता नाम द्वितीया तेनेह प्रवर्त
ते सर्पिषो बिन्दोर्द्वितीयानापिनायुक्तत्वात् ॥

[Marginal and interlinear glosses:] पदार्थस्य संभावना स्यात्तया = अपिशब्दः केन संबध्यते = कामचारानुज्ञा निन्दा [illegible] स्यादित्यस्य क्रियया कर्ता सर्पिषो बिन्दुः कर्मप्रवचनीयसंज्ञः संभावनायां = संज्ञाया भाग = प्रादयः क्रियायोगे उपसर्गसंज्ञा गतिसंज्ञाश्च स्युः =४ देवान् अतिक्रान्तः वा देवान् इत्यर्थः [illegible]

नुपसर्गत्वाद्बोधः अपिस्तुयाद्विद्युं संभावनेश स्मृत्कर्षमाविष्कर्तुमनुमिति अपिस्तुहि अत्रवप्सर्गः कामचा
रानुज्ञाधिम्नेस्वदनें अपिस्तुयाहूषल गर्हा अपिसिंच अपिस्तुहि समुच्चये कालधनोरत्यंतसंयोगे
इहद्वितीयास्यात् मासंकल्याणी मासमधीते मासंगुडधाना क्रोशंकुटिलानदी क्रोशमधीते क्रोशंगिरिः
अत्यंतसंयोगे किं मासस्य द्विरधीते क्रोशस्यैकदेशे पर्वतः स्वतंत्रं कर्ता क्रियायां स्वातंत्र्येण विवक्षि
तोर्थः कर्तास्यात् साधकतमं करणं क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात् तमप्ग्रहणं किं गं
गायांघोषः कर्तृकरणयोस्तृतीया अनभिहिते कर्तरि करणे च तृतीया स्यात् रामेण बाणेन हतो वा
ली प्रकृत्यादिभ्य उपसंख्यानं प्रकृत्याचारुः प्रायेण याज्ञिकः गोत्रेण गार्ग्यः समेनेति विषमेणै
ति द्विद्रोणेन धान्यं क्रीणाति सुखेन दुःखेन वा याति इत्यादि दिवः कर्म च दिवः साधकतमं कर्मसंज्ञं स्या
च्चात्करणसंज्ञं अक्षैरक्षान्वा दीव्यति अपवर्गे तृतीया अपवर्गः फलप्राप्तिस्तस्यां द्योत्यायां कालध्वनो
रत्यंतसंयोगे तृतीया स्यात् अह्ना क्रोशेन वानुवाकोऽधीतः फलप्राप्तिः किं मासमधीतो नायातः सह
युक्तेऽप्रधाने सहार्थेन युक्तेऽप्रधाने तृतीया स्यात् पुत्रेण सहागतः पिता एवं साकं सार्द्धं समं योगेऽपि
तद्योगे तृतीया वृद्धो यूनेति निर्देशात् येनांगविकारः येनांगेन विकृतेनांगिनो विकारः लक्ष्यते त
तस्तृतीया स्यात् अक्ष्णा काणः अक्षिसंबंधिकाणत्वविशिष्टमित्यर्थः अंगविकारः किं अक्षि काणमस्य

विनापि

पादेन खंजः
शिरसा खल्वाटः
कर्णेन बधिरः

पथान्वयशाहेतोद्वाध्याय परिच्छेदमत्र रक्षोर्हत तेजथा वेदशास्त्रे अनुदात्तोऽपि वर्तते = ४

काणत्वविशिष्टमस्तीत्यर्थः ७३

इत्थंभूते त्रो वाद्यकाकाकालद्रियात्मसमनोऽस्ति नैवेद=

ना४

अध्ययनेहेतुकं वसति =

क्रियाप्रयोजक [illegible] = १५

इत्थंभूतलक्षणे कुं विम्बकारं प्राप्तस्य लक्षणे तृतीया स्यात् जटाभिस्तापसः जटाज्ञाप्यतापसत्वविशिष्टः
संज्ञोऽन्यतरस्यां कर्मणि संज्ञपूर्वस्य ज्ञातेः कर्मणि तृतीया वा स्यात् पित्रा पितरं वा संजानीते हेतौ हेतु
र्थे तृतीया स्यात् द्रव्यादिसाधारणं निर्व्यापारं साधारणं च हेतुत्वं कारणत्वं तु क्रियामात्रविषयं
व्यापारनियतं च दण्डेन घटः पुण्येन दृष्टो हरिः फलमपीह हेतुः अध्ययनेन वसति गम्यमानापि क्रि
या कारकविभक्तौ प्रयोजिका अलं श्रमेण साध्यं नास्तीत्यर्थः इह साधनक्रियां प्रति श्रमः करणं
शतेन वत्सान्पाययति पयः शतेन परिच्छिद्येत्यर्थः अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया
दास्या संयच्छते कामुकः धर्म्ये तु भार्यायै संयच्छति कर्मणा यमभिप्रैति स संप्रदानं दानस्य कर्म
णा यमभिप्रैति स संप्रदानसंज्ञः स्यात् चतुर्थी संप्रदाने विप्राय गां ददाति अनभिहिते इत्येव दी
यते विप्रः क्रियया यमभिप्रैति सोऽपि संप्रदानं पत्ये शेते कर्मणः करणसंज्ञा संप्रदानस्य च कर्म प
शुना रुद्रं यजते पशुं रुद्राय ददातीत्यर्थः रुच्यर्थानां प्रीयमाणः रुच्यर्थानां धातूनां प्रयोगे प्रीय
माणोऽर्थः संप्रदानं स्यात् हरये रोचते भक्तिः अन्यकर्तृकोऽभिलाषो रुचिः हरिनिष्ठप्रीतेर्भक्तिः क
र्त्री प्रीयमाणः किं देवदत्ताय रोचते मोदकः पथि । श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः एषां प्रयोगे बो
धयितुमिष्टः संप्रदानं स्यात् गोपी स्मरात् कृष्णाय श्लाघते ह्नुते तिष्ठते शपते वा ज्ञीप्स्यमानः किं
देवदत्ताय श्लाघते पथि धारेरुत्तमर्णः धारेः प्रयोगे उत्तमर्ण उक्तसंज्ञः स्यात् भक्ताय

दाने योग्योऽस्ति यो [illegible] नोक्तः

दण्डोऽयं चेतनननिष्ठं =
अध्यालादि चेतननिष्ठं =

अभिप्रायविषयीकरोति =

नेहः अनन्त =

प्रसन्नकर्तृयोग =

साधकार
उत्तमर्ण = १
ऋणमाला
अधमर्ण = १

स्पृया॰

प्रकर्षेणयोगेतस्मिन तथा॰

का॰ च॰ स्॰
सि॰ कौ॰
५८

धारयतिमोक्षंहरिः उत्तमर्णः किं देवदत्तायशतंधारयतिग्रामे स्पृहेरीप्सितः स्पृहयतेः प्रयो
गेइष्टः संप्रदानंस्यात् पुष्पेभ्यः स्पृहयति ईप्सितः किं पुष्पेभ्योवने स्पृहयति ईप्सितमात्रे
इयंसंज्ञा प्रकर्षविवक्षायांतुपरत्वात्कर्मसंज्ञा पुष्पाणिस्पृहयति क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिको
पः क्रुधाद्यर्थानांप्रयोगेयंप्रतिकोपः सउक्तसंज्ञः स्यात् हरयेक्रुध्यति द्रुह्यति ईर्ष्यति असू
यति यंप्रतिकोपः किं भार्यामीर्ष्यति मैनामन्योद्राक्षीदिति क्रोधोऽमर्षः द्रोहोऽपकारः ई
र्ष्याक्षमा असूयागुणेषुदोषाविष्करणं द्रोहादयोपिकोपप्रभवाएवगृह्यन्तेऽतोविशेषणं
सामान्येनयंप्रतिकोपः क्रुधद्रुहोरुपसृष्टयोःकर्म सोपसर्गयोरनयोर्यंप्रतिकोपस्तत्कारकं
कर्मसंज्ञंस्यात् क्रूरमभिक्रुध्यति अभिद्रुह्यति राधीक्ष्योर्यस्यविप्रश्नः एतयोःकारकंसं
प्रदानसंज्ञंस्यात् यदीयोविविधः प्रश्नः क्रियतेकृष्णायराध्यति ईक्षतेवापृष्टोगर्गः शुभाशु
भंपर्यालोचयतीत्यर्थः प्रत्याङ्भ्यांश्रुवः पूर्वस्यकर्ता आभ्यांपरस्यशृणोतेर्योगेपूर्वस्यप्रव
र्तनरूपव्यापारस्यकर्तासंप्रदानंस्यात् विप्रायगांप्रतिशृणोति आशृणोतिवा विप्रे
णमह्यंदेहीतिप्रवर्तितः प्रतिजानीतइत्यर्थः अनुप्रतिगृणश्च आभ्यांगृणातेःकारकंपू
र्वव्यापारस्यकर्तृभूतमुक्तसंज्ञंस्यात् होत्रेऽनुगृणाति प्रतिगृणाति होताप्रथमंशंसति
तमध्वर्युःप्रोत्साहयतीत्यर्थः परिक्रयणेसंप्रदानमन्यतरस्यां नियतकालंभृत्यास्वी

५८

करणं परिक्रयणं तस्मिन् साधकतमं कारकं संप्रदानसंज्ञं वा स्यात् शतेन शताय वा परिक्रीतः
तादर्थ्ये चतुर्थी वाच्या मुक्तये हरिं भजति क्लृपि संपद्यमाने भक्तिर्ज्ञानाय कल्पते संपद्य
ते जायते इत्यर्थः उत्पातेन ज्ञापिते च वाताय कपिला विद्युत् हितयोगे च ब्राह्मणाय हितं
क्रियार्थोपपदस्य च कर्मणि स्थानिनः क्रियार्था क्रिया उपपदं यस्य तस्य स्थानिनोऽप्रयुज्यमा
नस्य तुमुनः कर्मणि चतुर्थी स्यात् फलेभ्यो याति फलान्याहर्तुं यातीत्यर्थः नमस्कुर्मो नृसिंहा
य नृसिंहमनुकूलयितुमित्यर्थः एवं स्वयंभुवे नमस्कृत्येत्यादावपि तुमर्थाच्च भाववचनात्
भाववचनाच्चेति सूत्रेण यो विहितस्तदन्ताच्चतुर्थी स्यात् यागाय याति यष्टुं यातीत्यर्थः
नमः स्वस्ति स्वाहा स्वधालंवषड्योगाच्च एभिर्योगे चतुर्थी स्यात् हरये नमः उपपदवि
भक्तेः कारकविभक्तिर्बलीयसी नमस्करोति देवान् प्रजाभ्यः स्वस्ति अग्नये स्वाहा पितृभ्यः स्व
धा अलमिति पर्याप्त्यर्थग्रहणं तेनेह दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्तः इत्यादि ॥
प्रभ्वादियोगे षष्ठ्यपि साधुः तस्मै प्रभवति स एषां ग्रामणीरिति निर्देशात् तेन प्रभुर्बुभूषुर्भुवनत्र
यं प्रसूत इति सिद्धं वषडिन्द्राय चकारः पुनर्विधानार्थः तेनाशीर्विवक्षायां परामपि चतुर्थी चाशि
षीति षष्ठीं बाधित्वा चतुर्थ्येव स्यात् स्वस्ति गोभ्यो भूयात् मन्यकर्मण्यनादरे विभाषाऽप्राणिषु
प्राणिवर्जे मन्यतेः कर्मणि चतुर्थी वा स्यात् तिरस्कारे न त्वां तृणं मन्ये तृणाय वा अप्राणि निर्दे
शान्नावादिके योगे न न त्वां नावं मन्ये अप्राणिष्वित्यपनीय नौकाकान्नशुकशृगालवर्ज्येष्विति

उपपदविभक्तिः पदमाश्रित्य जायमाना विभक्तिः कारकविभक्तिः क्रियामाश्रित्य जायमाना विभक्तिः

हरये नमः इत्यत्र नम इति पदमाश्रित्य हरये इति चतुर्थी उपपदविभक्तिः नमस्करोति देवानित्यत्र क्रियामाश्रित्य देवानिति द्वितीया कारकविभक्तिः उपपदविभक्तेरिति नमस्करोति देवानित्यत्र नमः योगे विहिता चा=

तु स्वबलविरोधे मतिपाककार्ये =

चतुर्थी चाशिषीति सूत्रेणोक्तषष्ठी प्राप्ता तां बाधित्वा =

अलमर्थानामन्येषामपि [redacted] ग्रहणम्

अप्रभवतियोगे चतुर्थी स्यात् =९
अप्रभवतियोगे षष्ठी प्राप्ता निमन्यकर्म इति सूत्रे अप्राणिष्विति पदेन नावनौकेति वक्तव्यमित्यर्थः =२

पा. क. प्र.
सि. कौ.
५५

वक्तव्यं तेन न त्वां नावं अत्र मन्यतेः कर्मत्वाप्राप्तावपि चतुर्थी न । न त्वां शृगालं मन्ये अत्र प्राप्तावपि भवत्येव । गत्यर्थक-
र्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि । अध्वभिन्ने गत्यर्थानां कर्मणि एते स्तः चेष्टायां ग्रामं ग्रामाय
वा गच्छति । चेष्टायां किं । मनसा हरिं व्रजति । अनध्वनीति किं । पन्थानं गच्छति । गन्त्रधिष्ठिते ध्वन्येवा-
यं निषेधः । यदा तूत्पथात् पन्था एव आक्रमितुमिष्यते तदा चतुर्थी भवत्येव । उत्पथेन पथे गच्छति । द्वि-
तीयाग्रहणं योगविभागार्थं वा धितं ग्रामं गन्ता ग्रामाय गन्ता । ध्रुवमपायेऽपादानं । अपायो विश्लेषस्तस्मि-
न् साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात् । अपादाने पञ्चमी । ग्रामादायाति । धावतोऽश्वात् पतति ।
कारकं किं । वृक्षस्य पर्णं पतति । जुगुप्साविरामप्रमादार्थानामुपसंख्यानं । पापाज्जुगुप्सते विर-
मति । धर्मात् प्रमाद्यति । भीत्रार्थानां भयहेतुः । भयार्थानां त्राणार्थानां च योगे भयहेतुरपादानं स्यात् ।
चौराद्बिभेति । चौरात् त्रायते । भयहेतुः किं । अरण्ये बिभेति त्रायते वा । पराजेरसोढः । पराजेः प्रयोगे
ऽसह्योऽर्थोऽपादानं स्यात् । अध्ययनात् पराजयते । ग्लायतीत्यर्थः । असोढः किं । शत्रून् पराजयते । अ-
भिभवतीत्यर्थः । वारणार्थानामीप्सितः । प्रवृत्तिविघातो वारणं । वारणार्थानां प्रयोगे ईप्सितोऽर्थो-
ऽपादानं स्यात् । यवेभ्यो गां वारयति । ईप्सितः किं । यवेभ्यो गां वारयति क्षेत्रे । अन्तर्द्धौ येनादर्शनमिच्छति ।
व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात् । मातुर्निलीयते कृष्णः । अ-
न्तर्द्धौ किं । चौरान्न दिदृक्षते । इच्छतीति ग्रहणं किं । अदर्शनेच्छायामसत्यां सत्यपि दर्शने यथा स्यात् । आख्या-
तोपयोगे । नियमपूर्वकविद्यास्वीकारे वक्ता प्राक्संज्ञः स्यात् । उपाध्यायादधीते । उपयोगे किं । नट-
स्य गाथां शृणोति । जनिकर्तुः प्रकृतिः । जायमानस्य हेतुरपादानं स्यात् । ब्रह्मणः प्रजाः
प्रजायन्ते ॥

उपसमीवेऽधीतिय सहउपाध्याय:=२

तस्य पर्याप्त तत्प्राह ... अपवादित्वा द्वितीया ... वाचकः तदा षष्ठ्येव न पंचमी किंतु अवयववाचियोगे तन्नेति पाणिनिर्देशात् = ८
पूर्वं कायस्येत्यत्रापि पूर्वशब्दः कस्यावयववाचि तस्य योगे द्वितीयैव न तु पंचमी किंतु अवयववाचि० निर्देशात् = ५

आसनात्प्रेक्षते २

भुवः प्रभवः भवनं भूः कर्तृप्रभवस्तथा हिमवतो गंगा प्रभवति तत्र प्रकाशत इत्यर्थः ल्यब्लोपे कर्मण्यधिकरणे च प्रासा
दात्प्रेक्षते आसनात्प्रेक्षते प्रासादमारुह्य आसने उपविश्य प्रेक्षत इत्यर्थः श्वशुराज्जिह्रेति श्वशुरं वीक्ष्येत्यर्थः गम्यमाना
पि क्रिया कारकविभक्तीनां निमित्तं कस्मात्त्वं नद्याः यतश्चाध्वकालनिर्माणं तत्र पंचमी तद्युक्ता
दध्वनः प्रथमासप्तम्यौ कालात्सप्तमी च वक्तव्या वनाद्ग्रामो योजनं योजने वा कार्तिक्या
आग्रहायणी मासे अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते एतैर्योगे पंचमी अन्य इत्य
र्थग्रहणम् इतरग्रहणं प्रपंचार्थं अन्यो भिन्न इतरो वा कृष्णात् आराद्वनात् ऋते कृष्णात्
पूर्वो ग्रामात् दिशि दृष्टः शब्दो दिक्शब्दः तेन संप्रति देशकालवृत्तिना योगेऽपि भवति चैत्रा
त्पूर्वः फाल्गुनः अवयववाचियोगे तु न तस्य परमाम्रेडितमिति निर्देशात् पूर्वं कायस्य अत्र
तरपदस्यापि दिक्शब्दत्वेऽपि षष्ठ्यतसर्थप्रत्ययेनेति षष्ठीं बाधितुं पृथग्ग्रहणम् प्राक् प्रत्यग्वा ग्रामात् आ
च् दक्षिणा ग्रामात् आहि दक्षिणाहि ग्रामात् अपादाने पंचमीति सूत्रे कार्तिक्याः प्रभृतीति
भाष्यप्रयोगात् प्रभृत्यर्थयोगे पंचमी भवात्प्रभृति आरभ्य वा सेव्यो हरिः अपपरिबहिरिति समा
सविधानात् ज्ञापकात् बहिर्योगे पंचमी ग्रामाद्बहिः अपपरी वर्जने एतौ वर्जने कर्मप्रवचनी
यौ स्तः आङ्मर्यादावचने आङ्मर्यादायामुक्तसंज्ञः वचनग्रहणादभिविधावपि पूर्वस्याप्यनु
वृत्तिः एतैः कर्मप्रवचनीयैर्योगे पंचमी स्यात् अपहरेः परिहरेः संसारः परिरत्र वर्जने लक्षणा
दौ तु हरिं परि आमुक्तेः संसारः आसकलाद्ब्रह्म प्रतिः प्रतिनिधिप्रतिदानयोः एतयोरर्थयोः प्रति
रुक्तसंज्ञः स्यात् प्रतिनिधिप्रतिदाने च यस्मात् अत्र कर्मप्रवचनीयैर्योगे पंचमी स्यात् प्रद्युम्नः
कृष्णात् प्रति तिलेभ्यः प्रतियच्छति माषान् अकर्तर्यृणे पंचमी कर्तृवर्जितं यद् ऋणं हेतुभूतं तत्र

आमार्थानामपेक्षामपि ग्रहणम्
षष्ठ्यतसर्थप्रत्ययेन एतद्योगे षष्ठी स्यात् =
अपपरिबहिरिति ... अपपरियोगे पंचमी ... अपवर्जनार्थ ... किं ... =
... तिलानां ... प्रतिदानं ... अयं संक्षेपः = ९
इयं नतररसर्थः
मुक्तिमर्यादाकृत
आऽऽऽ इ मर्यादावचनेनतयं वर्ती =
[redacted]
सकलमभिव्याप्य इत्यर्थः आऽऽऽ इः अभिविधौ व्याप्तौ तदा पंचमी =
वर्जितेत्यर्थः = इयं वर्जितेत्यर्थः =
आसनान्निमर्य =
तस्य परमाम्रेडितमिति तस्य परमा ... ॥
तन्मध्यवर्ति ... विधिः = व्याप्तिरित्यर्थः = ५

क॰: पं॰
सि॰ कौ॰
५८

तः पंचमी शताद्बद्धः अकर्तरीति किं शतेन बंधितः विभाषा गुणेऽस्त्रियां गुणे हेतावस्त्रीलिंगे पंचमी
वा स्यात् जाड्यात् जाड्येन वा बद्धः गुण इति किं धनेन कुलं अस्त्रियामिति किं बुद्ध्या मुक्तः विभाषेति योग
विभागाद् अगुणे स्त्रियां च क्वचित् धूमादग्निमान् नास्ति घटोऽनुपलब्धेः पृथग्विनानानाभिस्तृती
यान्यतरस्यां एभियोगे तृतीया स्यात् पंचमी द्वितीये च अन्यतरस्याङ्ग्रहणात् समुच्चयार्थे पं
चमीद्वितीये अनुवर्तेते पृथक् रामेण रामात् रामं वा एवं विना नाना करणे च स्तोकाल्पकृच्छ्र
कतिपयस्यासत्त्ववचनस्य एभ्योऽद्रव्यवचनेभ्यः करणे तृतीयापंचम्यौ स्तः स्तोकेन स्तोकाद्वा
मुक्तः द्रव्ये तु स्तोकेन विषेण हतः दूरान्तिकार्थेभ्यो द्वितीया च एभ्यो द्वितीया स्याच्चात् पंचमी
तृतीये प्रातिपदिकार्थमात्रे विधिरयं ग्रामस्य दूरं दूरात् दूरेण वा अन्तिकात् अन्तिकं अन्तिके
न वा असत्त्ववचनस्येत्यनुवृत्तेर्नेह दूरः पन्थाः षष्ठी शेषे कारकप्रातिपदिकार्थव्यतिरिक्तः स्व
स्वामिभावादिः शेषस्तत्र षष्ठी स्यात् राज्ञः पुरुषः कर्मादीनामपि संबन्धमात्रविवक्षायां षष्ठ्येव सतां गते
सर्पिषो जानीते मातुः स्मरति एधोदकस्योपस्कुरुते भजे शंभोश्चरणयोः फलानां तृप्तः षष्ठी
हेतुप्रयोगे हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात् अन्नस्य हेतोर्वसति सर्वनाम्नस्तृतीया
च सर्वनाम्नो हेतुशब्दप्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च केन हेतुना वसति कस्य हे
तोः निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनं किं निमित्तं वसति केन निमित्तेन कस्मै निमित्ता
येत्यादि एवं किं कारणं को हेतुः किं प्रयोजनमित्यादि प्रायग्रहणाद् असर्वनाम्नः प्रथ
माद्वितीये न स्तः ज्ञानेन निमित्तेन हरिः सेव्यः ज्ञानाय निमित्ताय इत्यादि षष्ठ्यतसर्थप्रत्य ५८
यन

निमित्तशब्दपर्यायाः निमित्तपर्यायाः कार्यकारणहेतुकारणादयस्ते तत्प्रयोगे सर्वा = ३ गोः

देवदत्तस्य गोः स्वस्वामिभावसंबन्धः ... सम्बन्धः मृदो घटः कार्यकारणभावसंबन्धः

एधोदकस्यार्थप्रत्यये

अस्मात्तादितरेणोदिक्शब्दात् प्रत्ययान्तदिग्युतोऽस्त्यर्थं ॥ वापवादः॥

भावेयज्ञते दत्ते रोगशाहः तस्य कर्मचौरः॥

पुरुषतसर्थेति अपवादाद्य दिक्शब्दे पंचमीन

अन्यतरस्यामित्यस्यग्रहणात्॥३

एतद्योगे षष्ठी स्यात् दिक्शब्देति पंचम्या अपवादः ग्रामस्य दक्षिणतः पुरः पुरस्तात् उपरि उपरि-
ष्टात् एनपा द्वितीया एनवेति योगविभागात् षष्ठ्यपि दक्षिणे-
न ग्रामं ग्रामस्य वा एवमुत्तरेण दूरान्तिकार्थैः षष्ठ्यन्यतरस्यां एतद्योगे षष्ठी स्यात् पंचमी च दू-
रं निकटं ग्रामस्य ग्रामाद्वा ज्ञोऽविदर्थस्य करणे जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षि-
ते षष्ठी स्यात् सर्पिषो ज्ञानं सर्पिषा उपायेन प्रवर्तनमित्यर्थः अधीगर्थदयेशां कर्मणि शेषे षष्ठी
स्यात् मातुः स्मरणं सर्पिषो दयनं ईशनं वा कृञः प्रतियत्ने कृञः कर्मणि शेषे षष्ठी गुणा-
धाने एधोदकस्योपस्करणं रुजार्थानां भाववचनानामज्वरेः भावकर्तृकाणां ज्वरवर्जितानां
रुजार्थानां कर्मणि शेषे षष्ठी चौरस्य रोगस्य रुजा अज्वरिसंताप्योरिति वाच्यं रोगस्य चौरज्वरः चौ-
रसंतापो वा रोगकर्तृकं चौरसंबंधि ज्वरादिकमित्यर्थः आशिषि नाथः आशीरर्थस्य नाथतेः शे-
षे कर्मणि द्वितीया सर्पिषो नाथनं आशिषीति किं माणवकनाथनं तत्संबंधिया च्ञेत्यर्थः
जासिनिप्रहणनाटक्राथपिषां हिंसायां हिंसार्थानामेषां शेषे कर्मणि षष्ठी चौरस्योज्जास-
नं निप्रौ संहतौ विपर्यस्तौ व्यस्तौ च चौरस्य निप्रहणनं प्रणिहननं निहननं प्रहणनं नटक्र-
थस्य हनने वृषादिः चौरस्योन्नाटनं चौरस्योत्क्राथनं वृषलस्य पेषणं हिंसायां किं धानापेषणं
व्यवहृपणोः समर्थयोः शेषे कर्मणि षष्ठी स्यात् द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता श-
तस्य व्यवहरणं पणनं वा समर्थयोः किं शलाकाव्यवहारः गणनेत्यर्थः ब्राह्मणपणनं स्तु-
तिरित्यर्थः दिवस्तदर्थस्य द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्या-

गाथाधीगार्थः॥१८

एधस्य उदकस्य च उपस्करणं पोषणं॥ रोगार्थकानामित्यर्थः

ज्वधिकरणे कर्त इत्यर्थः

[redacted]

एतत्विधिफलं ततसेति न्यायादेन वतेनयोगाद्द्वितीयाषष्ठ्यपि॥

इतिदियं॥२४

गुणाधाने॥

ज्वरस्य [illegible] रोगार्थकः

प्रथमोक्ते ज्वरेभत्र॥ अत्र रोगस्य इति संबंधे षष्ठी न तु [illegible]॥८

अत्रपाण न [illegible] भवति॥

[illegible]॥१२

[illegible]॥१२

अत्रपाण न [illegible] भवति॥१२

का० उ० अ०
सि० कौ०
५२

त पातनस्य दीव्यति तदर्थस्य किं ब्राह्मणान्दीव्यति स्तौति विभाषोपसर्गे पूर्वयोगापवादः शतस्य प्र
तिदीव्यति प्रेष्यब्रुवोः हविषो देवतासंप्रदाने देवतासंप्रदानेऽर्थे वर्तमानयोः प्रेष्यब्रुवोः
कर्मणो हविर्विशेषवाचकाच्छब्दात् षष्ठी स्यात् अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य अनु
ब्रूहि वा कृत्वोर्थप्रयोगे कालेऽधिकरणे कृत्वोर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी पंच
कृत्वोऽह्नो भोजनं द्विरह्नो भोजनं शेषे किं द्विरहन्यध्ययनं कर्तृकर्मणोः कृति कृद्योगे कर्तरि कर्म
णि च षष्ठी स्यात् कृष्णस्य कृतिः जगतः कर्ता कृष्णः गुणकर्मणि वेष्यते नेताऽश्वस्य स्रुघ्नं
स्रुघ्नस्य वा कृति किं तद्धितमा भूत् कृतपूर्वी कटं उभयप्राप्तौ कर्मणि उभयोः प्राप्तिर्यस्मि
न्कृति तत्र कर्मण्येव षष्ठी स्यात् आश्चर्यो गवां दोहोऽगोपेन स्त्रीप्रत्यययोरकाकारयोर्नायं
नियमः भेदिका बिभित्सा वा रुद्रस्य जगतः शेषे विभाषा स्त्रीप्रत्यय इत्येके विचित्रा जगतः कृ
तिर्हरेर्हरिणा वा केचिदविशेषेण विभाषामिच्छन्ति शब्दानामनुशासनमाचार्येणाचार्यस्य
वा क्तस्य च वर्तमाने वर्तमानार्थक्तस्य योगे षष्ठी स्यात् न लोकेति निषेधस्यापवादः राज्ञां मतः
बुद्धः पूजितो वा अधिकरणवाचिनश्च क्तस्य योगे षष्ठी इदमेषामासितं शयितं आसितं वा न लोका
व्ययनिष्ठाखलर्थतृनां एषां प्रयोगे षष्ठी न लादेशाः कुर्वन् कुर्वाणः सृष्टिं हरिः उ हरिं दिदृक्षुः
अलंकरिष्णुर्वा उक दैत्यान्घातुको हरिः कमेरनिषेधः लक्ष्म्याः कामुकः अव्ययं जगत्सृष्ट्वा सुखं १०
कर्तुं निष्ठा दैत्यान् हतवान् विष्णुना हता दैत्याः खलर्थः ईषत्करः प्रपञ्चो हरिणा ॥ चिति

कृत्वोर्थसंज्ञा
क्तवत् निष्ठा = २
अर्थ = २
खलर्थ = २
कृतवत् निष्ठा

भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा =

प्रत्याहारः प्रात् प्रानचाविति तृशब्दादारभ्यात् नोनकारात् शानचू सोमं पचमानः चानश् आत्मानं मेड
यमानः प्रात् वेदमधीयन् तत्न कर्तृलोकात् द्विषः शतृ वा मुरस्य मुरं वा द्विषन् सर्वोऽयं कारक विधिः =
स्यापतिषेधः शेषेतु षष्ठी स्यादेव ब्राह्मणस्य कुर्वन् नरस्य तिस्रः अकेनोर्भविष्यदाधमर्ण्य
योः भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेन च योगे षष्ठी न स्यात् सतः बालकोऽवतरति व्रजंगा अत्र द्वितीया बहुवचनं
मी शतं दायी क्तस्य ना वर्तमाने वा षष्ठी स्यात् मया मम वा मतो बुद्धः पूजितः कर्तरीति किं गेयो माणव अत्र साम्नां षष्ठी योगे
कः कः साम्नां भव्यगेयेति नीयच्च विधानात् अनभिहितकर्म अत्र योगो विभज्यते कृत्यानां उभ
यप्राप्तौ नेति निवृत्तौ चानुवर्तते तेन नेतव्या व्रजं गावः कृष्णेन नेतः कर्तरि वा उक्तार्थः तुल्यार्थ
स्तुलोपमाभ्यां तृतीयान्यतरस्यां तत्स्यार्थे योगे तृतीया वा स्यात् पक्षे षष्ठी तुल्यः सदृशः
समो वा कृष्णस्य कृष्णेन वा अतुलोपमाभ्यां किं तुला उपमा वा कृष्णस्य नास्ति चतुर्थी चाशि
ष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः एतदर्थयोगे चतुर्थी वा स्यात् आशिषि पक्षे षष्ठी आ
युष्यं चिरंजीवितं कृष्णाय कृष्णस्य वा भूयात् एवमद्रं भद्रं कुशलं निरामयं सुखं शं अर्थः प्र
योजनं हितं पथ्यं भूयात् आशिषि किं देवदत्तस्यायुष्यमस्ति व्याख्यानात्सर्वत्रार्थग्रहणं म
द्रभद्रयोः पर्यायत्वादन्यतरस्य पठनीयः ॥ आधारोऽधिकरणम् कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कार
कमधिकरणसंज्ञं स्यात् सप्तम्यधिकरणे च अधिकरणे सप्तमी स्यात् चकाराद्दूरान्तिकार्थेभ्यः औपश्ले
षिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा कटे आस्ते स्थाल्यां पचति मोक्षे इच्छास्ति सर्वस्मि
न्नात्मास्ति वनस्य दूरे अन्तिके वा दूरान्तिकार्थेभ्यः इति विभक्तित्रयमत्र सह सप्त विभक्तयः ५

कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कटः = अत्र आधारः स्थाली ओदनकर्मद्वारा तन्निष्ठक्रियाया आधारः स्थाली = मोक्षः सर्वहारः

का. सं. प्र.
सि. कौ.
५८

58

लिताः क्तस्येन्विषयस्य कर्मण्युपसंख्यानं अधीती व्याकरणे अधीतमनेनेति विग्रहे इष्टादिभ्यश्चे-
ति कर्तरीनिः निमित्तात्कर्मयोगे निमित्तमिह फलं योगः संयोगः समवायात्मकः चर्मणि द्वी-
पिनं हन्ति दन्तयोर्हन्ति कुञ्जरं केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः १ हेतौ तृतीया प्राप्ता सीमा-
ण्डकोशः पुष्कलको गन्धमृगः योगविशेषात्किं वेतनेन धान्यं लुनाति यस्य च भावेन भावलक्ष-
णम् यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात् गोषु दुह्यमानासु गतः साध्वसाधुप्र-
योगे च साधुः कृष्णो मातरि असाधुर्मातुले अर्हाणां कर्तृत्वेऽनर्हाणामकर्तृत्वे तद्वैपरीत्ये च स- अर्हाणामकर्तृत्वेऽनर्हाणां कर्तृत्वे इति वैपरीत्यम् = ५
त्सु तरत्सु असन्त आसते असत्सु तिष्ठत्सु सन्तस्तरन्ति सत्सु तिष्ठत्सु असन्तस्तरन्ति असत्सु तरत्सु
सन्तस्तिष्ठन्ति षष्ठी चानादरे अनादरोऽधिके भावलक्षणे षष्ठीसप्तम्यौ स्तः रुदति रुदतो वा
प्राव्राजीत् रुदन्तं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः स्वामीश्वराधिपतिदायादसाक्षिप्र-
तिभूप्रसूतैश्च एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं व-
चनं गवां गोषु वा स्वामी गवां गोषु वा प्रसूतः गा एवानुभवितुं जात इत्यर्थः आयुक्तकुशला-
भ्यां चासेवायां आभ्यां योगे षष्ठीसप्तम्यौ स्तस्तात्पर्ये आयुक्तो व्यापारितः आयुक्तः कुशलो वा ह-
रिपूजने हरिपूजनस्य वा आसेवायां किं आयुक्तो गौः शकटे ईषद्युक्त इत्यर्थः यतश्च निर्धारणं जा-
तिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः षष्ठीसप्तम्यौ
स्तः नृणां नृषु वा ब्राह्मणः श्रेष्ठः गवां गोषु वा कृष्णा बहुक्षीरा गच्छतां गच्छत्सु वा धावन्तः शी-

अवचकंपतासप्तमी पितिया =

ढः छात्राणां छात्रेषु वा मैत्रः पटुः पंचमी विभक्ते विभागो विभक्तं निर्द्धार्यमाणस्य यत्र भेद एव तत्र पंचमी
स्यात् माथुराः पाटलिपुत्रेभ्यः आढ्यतराः साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः अर्चायां यो
गे सप्तमी स्यादर्चायां न तु प्रतेः प्रयोगे मातरि साधुर्निपुणो वा अर्चायां किं निपुणो राज्ञो भृ
त्यः इह तत्त्वकथने तात्पर्यं अप्रत्यादिभिरिति वक्तव्यं साधुर्निपुणो वा मातरं प्रति पर्यनु वा
प्रसितोत्सुकाभ्यां तृतीया च आभ्यां योगे तृतीया स्याच्चात्सप्तमी प्रसितः उत्सुको वा हरिणा हरौ वा नक्षत्रे
च लुपि नक्षत्रे प्रकृत्यर्थे यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थः तत्र वर्तमानात् तृतीया
सप्तम्यौ स्तः अधिकरणे मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् मूले श्रवणे इति वा लुपि
किं पुष्ये शनिः सप्तमीपंचम्यौ कारकमध्ये शक्तिद्वयमध्ये यौ कालाध्वानौ ताभ्यामेते स्तः
अद्य भुक्त्वाऽयं द्व्यहे द्व्यहाद्वा भोक्ता कर्तृशक्त्योर्मध्येऽयं कालः इहस्थोऽयं क्रोशे क्रोशाद्वा
लक्ष्यं विध्येत् कर्तृकर्मशक्त्योर्मध्येऽयं देशः अधिकशब्देन योगे सप्तमी विधीयते तदस्मिन्न
धिकमिति यस्मादधिकमिति च सूत्रनिर्देशात् लोके लोकाद्वाधिको हरिः अधिरीश्वरे
स्वस्वामिसंबंधेऽपि कर्मप्रवचनीयसंज्ञः स्यात् यस्मादधिकं यस्य चेश्वरवचनं तत्र
सप्तमी अत्र कर्मप्रवचनीययुक्ते सप्तमी स्यात् उप परार्द्धे हरेर्गुणाः परार्द्धादधिका इ
त्यर्थः ऐश्वर्ये तु स्वस्वामिभ्यां पर्यायेण सप्तमी अधिभुवि रामः अधि रामे भूः सप्तमीशौण्डै
रिति समासपक्षे तु रामाधीनाः अषडक्षेत्यादिना खः विभाषा कृञि अधिः करोतौ तास्या।

सामर्थ्यं द्विविधं एकार्थीभाव व्यपेक्षा च स्वार्थपर्यवसायिनां पदानां
आकाङ्क्षादिवशात् परस्परसम्बन्धः व्यपेक्षा विशेषविशेष्यभावः ... गा गा

पदयोर्विधिः पदानां वा ॥ एकार्थीभावाश्रितो बोध्यः ॥

क्रोशो वा स्यात् दीव्यतेर्यत्र ग्राममधिकरिष्य विनियोगात् रत्नार्थः इह विनियोक्तुरीश्वरत्वं एकार्थ्यो ऽधजे
माते अगुतिता तिङि शेदातवशीनिविद्यातेन ॥ ७ ॥ इति विभक्त्यर्थाः ॥ ७ ॥
समर्थः पदविधिः पदसंबंधी यो विधिः स समर्थाश्रितो बोध्यः प्राक्कडारात्समासः कडाराः कर्मधारय इत्यतः
प्राक् समास इत्यधिक्रियते सह सुपा सह इति योगो विभज्यते सुबन्तं समर्थेन सह समस्यते योगविभागस्येष्टसिद्ध्य
र्थत्वात्कतिपयतिङन्तोत्तरपदोऽयं समासः स च छन्दस्येव पर्यभूषयत् अनुव्यचलत् सुपा सुप् सुपा सह समस्यते
समासत्वात्प्रातिपदिकत्वं सुपो धातुप्रातिपदिकयोः एतयोरवयवस्य सुपो लुक् स्यात् भूतपूर्वे चरट् इति नि
र्देशात्पूर्वनिपातः भूतपूर्वः इवेन समासो विभक्त्यलोपश्च जीमूतस्येव अव्ययीभावः अधिकारोऽयं
प्राक्तत्पुरुषात् अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्य
सादृश्यसंपत्तिसाकल्यान्तवचनेषु अव्ययमिति योगो विभज्यते अव्ययं समर्थेन समस्यते सोऽव्ययीभावः प्रथमानि
र्दिष्टं समास उपसर्जनं समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् उपसर्जनं पूर्वं समासे उपसर्जनं प्राक्
प्रयोज्यं एकविभक्ति चापूर्वनिपाते विग्रहे यन्नियतविभक्तिकं तदुपसर्जनं स्यात् न तु तस्य पूर्वनिपातः गोस्त्रियोरुपसर्ज
नस्य उपसर्जनं यो गोशब्दः स्त्रीप्रत्ययान्तं च तदन्तस्य प्रातिपदिकस्य ह्रस्वः स्यात् अव्ययीभावश्च अयमव्ययं नाव्ययी
भावादतोऽम्त्वपञ्चम्याः अदन्तादव्ययीभावात्सुपो न लुक् तस्य पंचमीं विना अमादेशः दिशयोर्मध्यमपदिशं क्ली
बेऽव्ययं त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियामित्यमरः तृतीयासप्तम्योर्बहुलं अदन्तादव्ययीभावात्तृतीया
सप्तम्योर्बहुलममभावः स्यात् अपदिशं अपदिशेन अपदिशे बहुलग्रहणात् ... तृतीयासप्तम्योर्बहुलमित्यादेः
सप्तम्या नित्यममभावः विभक्तीत्यादेरयमर्थः विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तेन सह समस्यते सोऽव्ययी।

अव्ययीभावश्चेत्यव्ययसंज्ञाकरणात् अव्ययादाप्सुप इति लोपे प्राप्ते तस्य बाधकोऽव्ययीभावादतोऽमिति तथा ॥ अव्ययीभावादेव मा भूत् न तथा अपदिशमिति तत्र मध्यः उक्तार्थः
दिग्द्वयोः मध्यमिति स्थिते समर्थः पदविधिरिति समर्थैः तेन प्रथमानिर्दिष्टं समासेऽनेन मध्यमिति ... अपदिशमिति तेनापदिशमिति ... अपदिशमिति उपसर्जनस्य प्राक् प्रयोगः
ततः मध्यार्थे कोऽपि ... अव्ययं विभक्ति ... तेन सुपो धातु ... अव्ययीभावः ... समासे अव्ययीभावे

तावत्कोर्ऽकेभ्यः स्यर्थः सर्वेत्र भत कारके इत्येतस्मिन्नर्थे समासे द्वौहितीर्थ उत्तरो हितः

यीभावः विभक्तौ तावत् इत्येतस्मिन् हरि इत्यस्मिन् समर्थे सप्तम्यर्थस्य द्योतको ऽधिः हराविति अधिहरि लौकिके विग्रह इवाक्ये
अत्र निपातेनाभिहितत्वाधिकरणे वचनसामर्थ्यात् समासो अव्ययीभावश्च अयं नपुंसकं स्यात् इत्येन नपुंस
के प्रातिके इत्य गोपायति गाः पातिवा गोपाः तस्मिन्नित्यधिगोपं समीपे कृष्णस्य समीपमुपकृष्णं समया
मनिकषा लङ्का आराद्वनादि इत्यत्राव्ययीभावः अभितः परितः अन्यापादि त्रिषु द्वितीया पञ्चम्योर्वि
धानसामर्थ्यात् मद्राणां समृद्धिः सुमद्रं यवनानां व्यृद्धिर्दुर्यवनं विगताऋद्धिः व्यृद्धिः मक्षिकाणा
मभावो निर्मक्षिकं हिमस्यात्ययो ऽतिहिमं आत्ययो ध्वंसः निद्रा संप्रति न युज्यत इत्यतिनिद्रं हरिशु
ब्दस्य प्रकाश इतिहरि। विसोपप्रमादनं विग्रहः पश्चात् कृष्णस्यानुकृष्णं ततः पश्चात् अनु रथस्य पश्चा
त् योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यानि यथार्थाः अनुरूपं रूपस्य योग्यमित्यर्थः अर्थमर्थं प्रतिप्रत्यर्थं
शक्तिमनतिक्र
म्य यथाशक्ति हरेः सादृश्यं सहरि। वक्ष्यमाणेन सहस्य सः ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं चक्रेण युगपदि
ति विग्रहे अव्ययीभावे चाकाले सहस्य सः स्यादव्ययीभावे न तु काले सचक्रं कालेन सहशब्दे सह
शः सख्या समसखि। यथार्थेन नैव सिद्धे पुनः सादृश्यग्रहणं गुणभूते सादृश्ये यथा स्यादित्येवमर्थं तत्रा
णांसंपत्तिः सहृत्रं क्षत्रं संपत्तिः अनुरूप आत्मभावः संपत्तिरिति भेदः तृणमप्यपरित्यज्य सतृणमत्ति
साकल्ये नेत्यर्थः न चात्र तृणं भक्षणे तात्पर्यं अन्ते अग्निग्रन्थपर्यन्तमधीते साग्नि। यथा सादृश्ये सादृश्ये एव यथाश
क्तिः समस्यते तेनेह न यथाहरिस्तथा हरः हरेरुपमानत्वं यथा शब्दो द्योतयति तेन न सादृश्यमिति वा यथार्थ
इति वा प्राप्तं निषिध्यते यावदवधारणे यावन्तः श्लोकास्तावन्तो ऽच्युतप्रणामाः यावच्छ्लोकं सुप्रतिना मात्रा
र्थे शाकस्य लेशः शाकप्रति मात्रार्थे किं स्तस्प्रतिविधानं विधृत अक्षशलाकासंख्याः परिणा द्यूतव्यव

ननु यथार्थे इत्येतद् ... सादृश्यवाचको ... तेनात्राव्ययीभावेन विशेषणमुक्तम् अक्षशलाकाशब्दौ पर्यायौ

समासस्थो ... अर्थे ... प्रतिप्रत्यर्थमेके ...
सह के विभ्रष्ट ...
... प्रतिना मात्रा ...

स॰ अ॰
सि॰ कौ॰
६

द्वौ परतत्त्वेप एवायं समासः अस्तेण विपरीतं कृत्समत्तपरीः नालाकापरि एकपरि विभाषा। अधिकारोऽयं
एतस्माद्ध्यादेव प्राचीनानां नित्यसमासत्वं सुप्सुपेति तेन नित्यसमासेः अव्ययमित्यादिसमासविधानात्
ज्ञापकात् अपपरिबहिरंचवः पंचम्या। अपविष्णुसंसारः अपविष्णोः परिविष्णु परिविष्णोः बहिर्वनं बहिर्व
नात् प्राग्वनं प्राग्वनात् आङ् मर्यादाभिविध्योः एतयोराङ् पंचम्यंतेन वा समस्यते सोऽव्ययीभावः आमु
क्तिसंसारः आमुक्तेः आबालं हरिभक्तिः आबालेभ्यः ॥ लक्षणेनाभिप्रती आभिमुख्ये आ
भिमुख्यद्योतकाव् अभिप्रती चिह्नवाचिना सह वा प्राग्वत् अभ्यग्निशलभाः पतं
ति अग्निमभि प्रत्यग्नि अग्निं प्रति अनुर्यत्समया यत्पदार्थसमया तेन लक्षणभू
तेनानुः समस्यते सोऽव्ययीभावः अनुवनमशनिर्गतः वनस्य समीपं गत इत्य
र्थः यस्य चायामः यस्य दैर्घ्यमनुना द्योत्यते तेन लक्षणभूतेनानुः समस्यते अनुगंगं वारा
णसी गंगायाः अनु गंगादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः तिष्ठद्गुप्रभृतीनि च एतानि नि
पात्यंते तिष्ठंति गावो यस्मिन् काले सतिष्ठद्गुः दोहनकालः आयातीगवं ईहत्यात्रादेशः
प्रवहावीव हः समासांतश्च निपात्यते इत्यादि पारेमध्ये षष्ठ्या वा पारमध्यशब्दौ षष्ठ्यं
तेन सह वा समस्येते एदंतत्वं चानयोर्निपात्यते पक्षे षष्ठीतत्पुरुषः पारेगंगादानय गंगापारा
त् मध्येगंगात् गंगामध्यात् महाविकल्पेन वाक्यमपि गंगायाः पारात् गंगाया मध्यात् संख्यावं
श्येन वंश्यो द्विधा विद्यया जन्मना च तत्रभवो वावश्यः तद्वाचिना सह संख्या वा समस्यते
यां

अवश्यप्रभाः तत्ताः अग्निर्लक्ष्यः
तः
लक्षणेनाभिप्रती ... कार्थनिष्ठतया समानाधिकरण्ये
लटः शतृशानचावितत्र प्रथमासमानाधिकरणे ... शत्रादेशः ३।२
एतत्तत्वनिपातनेनसमस्यर्थोवाबोध्यः
... टस्यप्रमयः ५८
पंचम्यावहिरादय अपपरीवर्जने निमात्रसमाहृतेनपुंसकवत्तं ५४ सि

द्वौ मुनी वंश्यौ द्विमुनिः व्याकरणे त्रिमुनि विद्यानां क्षतामभेदविवक्षया त्रिमुनि व्याकरणं एकवि
शतिभारद्वाजं नदीभिश्च नदीभिः संख्यासाग्वत् समाहारे चायमिष्यते सप्तगंगं द्वियमुनं अ
न्यपदार्थे च संज्ञायां अन्यपदार्थे विद्यमानं सुबंतं नदीभिः सह समस्यते संज्ञायां विभाषाधि
कारेपि वाक्येन संज्ञानवगमादिह नित्यसमासः उन्मत्तगंगं नाम देशः लोहितगंगं समासांता
इत्यधिकृत्य अव्ययीभावे शरत्प्रभृतिभ्यः शरदादिभ्यष्टच् स्यात् समासांतोऽव्ययीभावे शरदः समी
पमुपशरदं प्रतिविपाशं शरद् विपाश् अनस् मनस् उपानह् दिव् हिमवत् अनडुह् दिश्
दृश् विश् चेतस् चतुर् त्यद् तद् यद् कियत् जराया जरस् च उपजरसं प्रतिपरसमनुभ्योऽक्ष्णः
इति च वक्तव्यं अक्ष्णः परमिति विग्रहे समासांतविधानसामर्थ्यादव्ययीभावः परोक्षे लिट् इति नि
पातनात् परस्योकारादेशः परोक्षं परोक्षा क्रिया इत्यादि बहुव्रीहावयं समस्तं अन्वक्षं अनश्च अ
न्नंतादव्ययीभावाट्टच् स्यात् नस्तद्धिते नांतस्य भस्य टेर्लोपः स्यात्तद्धिते उपराजं अध्यात्मं नपुं
सकादन्यतरस्यां अन्नंतं यत् क्लीबं तदंतादव्ययीभावाट्टज्वा उपचर्मं उपचर्म नदीपौर्णमास्याग्रहाय
णीभ्यः वा टच् उपनदं उपनदि उपपौर्णमासं उपपौर्णमासि उपाग्रहायणं उपाग्रहायणि झ
यः झयंतादव्ययीभावाट्टज्वा उपसमिधं उपसमित् गिरेश्च सेनकस्य गिर्यंतादव्ययीभावाट्टज्वा सेन
कस्य मते उपगिरं उपगिरि इत्यव्ययीभावः

तत्पुरुषः अधिकारोऽयं प्राग्बहुव्रीहेः द्विगुश्च द्विगुरपि तत्पुरुषसंज्ञः स्यात् इदं सूत्रं त्यक्तुं शक्यं संख्यापूर्वो द्विगुरिति पठित्वा चकारबलेन संज्ञासमावेशस्य सुवचत्वात् समासान्तप्रयोजनं पं चराजं द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः द्वितीयान्तं श्रितादिप्रकृतिकैः सुबन्तैः सह समस्यते वा स तत्पुरुषः कृष्णं श्रितः कृष्णश्रितः दुःखातीतः गम्यादीनामुपसंख्यानं ग्रामं गामी ग्रामगामी अन्नं बुभुक्षुः अन्नबुभुक्षुः स्वयं क्तेन द्वितीयेति न सम्बध्यतेऽयोग्यत्वात् स्वयंकृतस्यापत्यं स्वायंकृतिः खट्वा क्षेपे खट्वाप्रकृतिकं द्वितीयान्तं क्तान्तप्रकृतिकेन सुबन्तेन समस्यते निन्दायां खट्वारूढो जाल्मः नित्यसमासोऽयं न हि वाक्येन तदर्थो गम्यते सामि सामिकृतं कालाः ... व अनत्यन्तसंयोगार्थं वचनं मासं प्रमितः प्रतिपच्चन्द्रः मासं परिच्छेत्तुमारब्धवान् अत्यन्तसंयोगे च कालाः इत्येव अक्तान्तार्थं वचनं मुहूर्तं सुखं मुहूर्तसुखं तृतीया तत्कृतार्थेन गुणवचनेन तत्कृतेति लुप्ततृतीयाकं तृतीयान्तं तृतीयान्तार्थकृतगुणवचनेनार्थशब्देन च सह प्राग्वत् शङ्कुलया खण्डः शङ्कुलाखण्डः धान्येनार्थो धान्यार्थः तत्कृतेति किं अक्ष्णा काणः पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः तृतीयान्तमेतैः प्राग्वत् मासपूर्वः मातृसदृशः पितृसमः माषोनं वाक्कलहः आचारनिपुणः गुडमिश्रः आचारश्लक्ष्णः मिश्रग्रहणं सोपसर्गस्यापि ग्रहणाय मिश्रं चानुपसर्गमसन्धौ इति त्वनुपसर्गग्रहणं ...

ऊनार्थे किम् माषेण विकलः ...
कर्षापणं कार्षिकः ...

त गुडसंमिश्रिता धानाः अवरस्योपसंख्याने मासेनावरो मासावरः कर्तृकरणे कृता बहुलं कर्तृ
रिकरणे तृतीया बहुलं प्राग्वत् हरिणा त्रातः हरित्रातः नखैर्भिन्नो नखभिन्नः कृद्ग्रहणे गति
कारकपूर्वस्यापि ग्रहणं नखनिर्भिन्नः कर्तृकरणे किं भिक्षाभिरुषितः हेतावेषा तृतीया बहुलग्रह
णं सर्वोपाधिव्यभिचारार्थं तेन दात्रेण लूनवानित्यादौ न कृताकि काष्ठैः पचति तराम् कृत्यैरधि
कार्थवचने स्तुतिनिन्दाफलकमर्थवादवचनमधिकार्थवचनं तत्र कर्तरि करणे च तृतीया कृत्यै
सह प्राग्वत् वातच्छेद्यं तृणं काकपेया नदी अन्नेन व्यंजनं संस्कारकद्रव्यवाचकं तृतीयान्तमन्ने
न प्राग्वत् दध्ना ओदनो दध्योदनः इहान्तर्भूतोपसेचनक्रियाद्वारा सामर्थ्यं भक्ष्येण मिश्रीकर
णं गुडेन धाना गुडधाना मिश्रीकरणक्रियाद्वारा सामर्थ्यं चतुर्थी तदर्थार्थबलिहितसुख
रक्षितैः चतुर्थ्यन्तार्थाय यत्तद्वाचिना अर्थादिभिश्च चतुर्थ्यन्तं प्राग्वत् तदर्थेन प्रकृतिविकृतिभा
व एव बलिरक्षितग्रहणात् ज्ञापकात् यूपाय दारु यूपदारु नेह रन्धनाय स्थाली अश्वघासा
दयस्तु षष्ठीसमासाः अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यं द्विजायायं द्विजार्थः सूपः द्वि
जार्था यवागूः द्विजार्थं पयः भूतबलिः गोहितं गोसुखं गोरक्षितं ॥ पंचमी भयेन चौरान्भयं चौरभयं भय
भीतभीतिभीभिरिति वाच्यम् वृकभीतः वृकभीतिः अपेतापोढमुक्तपतितापत्रस्तैरल्पशः एतैः स

प्रकृतिकारणं =
विकृतिकार्यं =

तृतीयाबहुवचने

कल्पनायाः सकाशादपोढः विनिर्गतः कल्पनाकर्तृम नर्थ इत्यर्थः —

विप्रकृष्टादागतः २

पूर्वस्योपोधान प्राप्ति पादिकयोरिति ह्नेण विभक्ति लोपो प्राप्तः ततः तृजकाभ्यां कर्तरीत्यनेन सुपाद्याप्ति सा निषेधो प्राप्तः तस्य याजकादिभिश्चेत्यनेन निषेधो प्राप्तः अपवादापवादे पुनरुत्सर्गस्य स्थितिरित्यनेनन्यायेन विभक्ति लोपः ततः तत्पुरुष समासो जातः —

हाल्यपंचमय्यंत समस्यते सतत्पुरुषः सुखापेतः कल्पनापोढः चक्रमुक्तः स्वर्गपतितः तरंगापत्र स्तः ग्रल्पशः किं प्रासादात्पतितः स्तोकादिति कइत्यर्थः कृच्छ्रात्केन स्तोकान्मुक्तः अल्पान्मु क्तः अतिक्रादागतः अभ्यासादागतः दूरादागतः कृच्छ्रादागतः पुनस्पास्तोकादिषुलुक् षष्ठी राज्ञः पुरुषः राजपुरुषः याजकादिभ्यश्च एभिः षष्ठन्तसमस्यते तृजकाभ्यां कर्तरीत्या स्य प्रतिप्रसवार्थं ब्राह्मणयाजकः देवपूजकः गुणात्तरेणा तरलोपश्चेति वक्तव्य तरवंतेय गुणवाचिनेनसमासः ननिर्द्धारणे पूरणगुणेति च प्रतिषेधस्य प्रतिप्रसवार्थं सर्वेषां श्वे तरः सर्वश्वेतः सर्वेषां महत्तरः सर्वमहान् कृद्योगा च षष्ठीसमस्यत इति वाच्यं इध्मव्रश्चनः ननिर्द्धारणे निर्द्धारणे या षष्ठी सा न समस्यते नृणां द्विजः श्रेष्ठः प्रतिपदविधाना षष्ठी न समस्यते इति वाच्यम सर्पिषो ज्ञानं पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन पूरणार्थैः सदादिभिश्च षष्ठी न समस्यते पूरणे सतां षष्ठः गुणे काकस्य कार्ष्ण्यं ब्राह्मणस्य शुक्ला यदा प्रकरणादिना दंता इति विशेष्यं ज्ञातं तदेदमुदाहरणं अनित्यायं गुणेन निषेधः संज्ञाप्रमा णत्वादित्यादिनिर्देशात् तेनार्थगौरवं बुद्धिमाद्यमित्यादि सिद्धं सुहितार्थास्तृप्त्यर्थाः फलानां सुहि तः तृतीयासमासस्तु स्यादेव स्वरे विशेषः सत् द्विजस्य कुर्वन् कुर्वाणो वा किंकरः इत्यर्थः अ व्ययं ब्राह्मणस्य कृत्वा पूर्वोत्तरमाहचर्यात् कृदव्ययं गृह्यते तेनतदुपरीत्यादि सिद्धमिति तर

स॰ त॰ सि॰ कौ॰ ६२ पा॰

विदग्धलक्षिते निर्द्धारणर्थाः सा षष्ठी प्रवर्तितं ६४

ज्ञाति विशेषो वाद्धलं गुणशब्दः विशेषवाची — २

ब्राह्मणस्य कृतेति ...

भद्र १

तृजकाभ्यां कर्तरीत्यनेन निषिद्धा प्राप्तः तस्य याजकादिभि निषिद्धा —

सर्वेषां गुणानि

FF द्वीत्यादेति कर्मण — ७

जातिविशेषो गुणशब्दो विशेषणम् — ६

न्यायविद्येषस्य करणे इत्यादि सूत्रेण दसलत्त्वार्थं विहितायामस्य कार्थे षष्ठीसा प्रतिपदविधाना षष्ठी — ८

तव्यताम वर्तवेतिनाहत्ते
निरनुबंधग्रहणादि ति भावः

उभयोः प्राप्तिर्यस्मिन्निति नत्रकर्मण्येव षष्ठी स्यात् ×

त्तिः तव्य ब्राह्मणस्य कर्तव्यं तव्यता भवतैव स्वकर्तव्यं स्वयमेव समानाधिकरणे तक्षकस्य स
र्पस्य विशेषणसमासस्त्विह बहुलग्रहणान्न गार्ग्येणोचितादिषु पोटायुवतीत्यादीनां विभक्ते
तरश्चरितार्थानां परत्वाद्बाधकः षष्ठीसमासः सोऽप्यनेन वार्यते क्तेन च पूजायां मतिबुद्धीति
ता० ४ पा० ४ सूत्रेण विहितो यः क्तस्तेन षष्ठी न समस्यते राज्ञां मतः बुद्धः पूजितो वा राज्ञः पूजित
इत्यादौ तु भूते क्तो तेन सह षष्ठीयात्तस्य समासः अधिकरणवाचिना च क्तेन ष
ष्ठी न समस्यते इदमेषामासितं गतं भुक्तं वा कर्मणि च उभयप्राप्तौ कर्मणीति
या षष्ठी सा न समस्यते आश्चर्यो गवां दोहोऽगोपेन तृजकाभ्यां कर्तरि कर्त्रर्थे
तृजकाभ्यां षष्ठ्या न समासः अपां स्रष्टा वज्रस्य भेत्ता ओदनस्य पाचकः क
र्तरि किं इक्षूणां भक्षणमिक्षुभक्षिका पत्यर्थभर्तृशब्दस्य याजकादित्वात्स
मासः भूभर्ता कथं तर्हि घटानां निर्मातुस्त्रिभुवनविधातुश्च कलह इति शे
षषष्ठ्या समास इति कैयटः कर्तरि च कर्तृषष्ठ्याऽकेन न समासः भवतः शा
यिका नेह तृजनुवर्तते तद्योगे कर्तुरभिहितत्वेन कर्तृषष्ठ्या अभावात्

राजभिः पूजित सतथा

अकर्तृवाचीत जग्रहे योगः
कथं याजकादित्वात् समासः

तत्र कर्ताभिहितः तत्रैव षष्ठी

एकाधिकरणं एकत्वसंख्यापन्नं — अत्र एकत्वं नास्ति ×

स्थाल्याः पृष्ठभागस्य ... तेन पृष्ठस्थानस्य ×
क्रोडस्य ... ॥

नित्यं क्रीडाजीविकयोः एतयोरर्थयोरकेन नित्यं षष्ठी समस्यते उद्दालकपुष्पभञ्जिका
क्रीडाविशेषसंज्ञा संज्ञायामिति भावे ण्वुल् जीविकायां दन्तलेखकः तत्र क्रीडायां विक
ल्पे जीविकायां तृजकाभ्यां कर्तरीति निषेधे प्राप्ते वचनं पूर्वापराधरोत्तरमेकदेशिनै
काधिकरणे अवयविना सह पूर्वादयः समस्यन्ते एकत्वसंख्याविशिष्टश्चेदवयवी
षष्ठीसमासापवादः पूर्वं कायस्य पूर्वकायः अपरकायः एकदेशिना किं पूर्वं ना
भेः कायस्य एकाधिकरणे किं पूर्वं छात्राणां सर्वोऽप्येकदेशोऽह्ना समस्यते संख्या
विसायेति ज्ञापकात् मध्याह्नः सायाह्नः केचित्तु सर्व एकदेशः कालेन समस्यते
न त्वह्नैव ज्ञापकस्य सामान्यापेक्षत्वात् तेन मध्यरात्रः उपास्तात्पश्चिमरात्रे गोचरादस्मा
दित्यिश्रमित्याहुः अर्द्धं नपुंसकम् समांशवाच्यर्द्धशब्दो नित्यं क्लीबे प्राग्वत् ॥ एकविभ
क्तावषष्ठ्यन्तवचनं एकदेशिसमासविषये यमुपसर्जनसंज्ञानिषेधः तेन पञ्चखट्वीत्यादि
सिद्ध्यति अर्द्धं पिप्पल्याः अर्द्धपिप्पली क्लीबे किं ग्रामार्द्धः द्रव्यैकत्व एव अर्द्धं पिप्पलीनां द्विती
यतृतीयचतुर्थतुर्याण्यन्यतरस्याम् एतान्येकदेशिना सह प्राग्वत् द्वितीयं भिक्षायाः द्वितीयभिक्षा

सर्वोऽपि ... विकल्पः पुनः अन्यतरस्यामिति ... ×

अन्यतरस्याम् =

अत्राद्धे ... जीवत्वं नास्ति
किं तु पुरुषस्य

यस्य हि जननात् द्व्यं मासो जातः स मासजातः × ६

अत्र द्व्यह्नात्पूर्वं तीय प्रत्ययः
द्व्यह्नो संख्याद्वन्दः द्वितीय ×

तेन अकारस्य ग्रहणेन प्राप्ता इत्यत्र प्राप्ताइति जायते + ७

यः

एकदेशिना किं द्वितीयं भिक्षायाः भिक्षुकस्य अन्यतरस्यांग्रहणं सामर्थ्यात् [illegible] गुणेति
निषेधं बाधित्वा पक्षे षष्ठीसमासः भिक्षाद्वितीयं प्राप्तापन्ने च द्वितीयया पन्ने द्वितीयाश्रिते
ति समासः प्राप्तो जीविकां प्राप्तजीविकः जीविकाप्राप्तः आपन्नजीविकः जीविकापन्नः
इह सूत्रे द्वितीयया अ इति विभक्ता अकारोपि विधीयते तेन जीविकां प्राप्ता स्त्री प्राप्तजी
विका आपन्नजीविका कालाः परिमाणिना परिच्छेद्यवाचिना सुबन्तेन सह कालाः समस्यंते
मासो जातस्य मासजातः द्व्यहजातः द्वयोरह्नोः समाहारो द्व्यहः द्व्यहो जातस्येति विग्रहः
उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानं द्व्यह्नो जातस्य
स द्व्यह्नजातः अह्नोह्न इति वर्त्तमाने अह्नादेशः सर्वैकदेशसंख्यादेः समाहार इति न
निषेधः सप्तमी शौण्डैः सप्तम्यंतं शौण्डादिभिः प्राग्वत् अक्षेषु शौण्डः अक्षशौण्डः अधि
शब्दोत्र पठ्यते अध्युत्तरपदादिति खः ईश्वराधीनः सिद्धशुष्कपक्वबन्धैश्च एतैः स
प्तमी प्राग्वत् सांकाश्यसिद्धः आतपशुष्कः स्थालीपक्वः चक्रबन्धः ध्वांक्षेण क्षेपे
ध्वांक्षवाचिना सप्तम्यंतं प्राग्वत् निंदायां तीर्थध्वांक्ष इव तीर्थध्वांक्षः तीर्थकाकः कृत्यैर्ऋ
णे सप्तम्यंतं कृत्यप्रत्ययान्तैः सह प्राग्वत् अवश्यके मासे देयमृणं मासदेयं ऋणं किं

नक्षिताद्यैर्जातपदसमाहारे न [illegible] वर्त्तमाने [illegible] नानुत्तरपदे हेतु कद्विगुः सिध्यतीत्येतदर्थ
उत्तरपदेनेत्यादि वार्त्तिकम् + ३

प्रौढः [illegible] तत्रभवाः प्रवीणाः संवीतांगाः [illegible] पदे [illegible] तेन [illegible] लोके निपुणानि ×
अनवस्थित इत्यर्थः × २

शौण्डादिगणः

स.त.
सिं.कौ.
६४

मासेदेयामिन्ना पूर्वाह्णेगेयंसाम संज्ञायां सप्तम्यंतं सुपा प्राग्वत् संज्ञायां वाक्येन संज्ञान
वगमान्नित्यसमासोऽयं अरण्येतिलकाः वनेकसेरुकाः हलदंतात्सप्तम्याः संज्ञायामित्य
लुक् क्तेनाहोरात्रावयवाः अह्नोरात्रेश्चावयवाः सप्तम्यंताः क्तांतेन सह प्राग्वत् पूर्वाह्ण
कृतं अपररात्रकृतं अवयवग्रहणात् किं अह्नि दृष्टं तत्र तत्रेत्येतत्सप्तम्यंतं क्तांतेन
सह प्राग्वत् तत्रभुक्तं क्षेपे सप्तम्यंतं क्तांतेन प्राग्वन्निंदायां अवतप्तेनकुलस्थितं तव एतत् पा
त्रेसमितादयश्च एते निपात्यंते क्षेपे पात्रेसमिताः भोजनसमय एव संगता न तु कार्ये गेहे
शूरः गेहेनर्दी आकृतिगणोऽयं चकारोऽवधारणार्थः नैतेषामसमासांतरे घटकतया प्र
वेशो न तेन परमाः पात्रेसमिता इति पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन
विशेषणं विशेष्येणेति सिद्धे पूर्वनिपातनियमार्थं सूत्रं एकशब्दस्य दिक्संख्ये संज्ञायामिति
नियमबाधनार्थं च पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्तः एकनाथः सर्वयाज्ञिकाः
जरन्नैयायिकाः पुराणमीमांसकाः नवपाठकाः केवलवैयाकरणाः दिक्संख्ये संज्ञायां स
मानाधिकरणेनेत्यापादपरिसमाप्तेरधिकारः संज्ञायामेवेति नियमार्थं सूत्रं पूर्वेषुकामशमी स
प्तर्षयः नेह उत्तरा वृक्षाः पंच ब्राह्मणाः तद्धितार्थोत्तरपदसमाहारे च तद्धितार्थविषये उत्तर
पदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत् पूर्वस्यां शालायां भवः पौर्वशालः समाहे

कृते विकल्पः पूर्वपदादसंज्ञायामगः इति णत्वं सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः आपरशालः पूर्वा शाला प्रिया यस्य
ति विग्रहे पुंवद्भावे कृते प्रियाशब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः तेन शालाशब्द आकार उदात्तः पूर्वशाला
प्रियः दिक्समासे संज्ञायाम् नाम्नानभिधानात् संख्यायास्तद्धितार्थे षण्णां मातॄणामपत्यं षाण्मातुरः पंच
गावो धनं यस्येति त्रिपदे बहुव्रीहौ अवान्तरतत्पुरुषस्य विकल्पे प्राप्ते द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवच
नं नित्यमुत्तरपदे इति तत्पुरुषाद्बहुव्रीहिः समासान्तो नतद्धितलुकि पंचगवधनः पंचाना
गवां समाहारः संख्यापूर्वो द्विगुः तद्धितार्थेत्यत्रोक्तः संख्यापूर्वो द्विगुः स्यात् द्विगुरेकवच
नं द्विग्वर्थे समाहार एकवत् स नपुंसकमिति नपुंसकत्वं पंचगवं कुत्सितानि कुत्सनैः
कुत्स्यमानानि कुत्सनैः सह प्राग्वत् वैयाकरणखसूचिः मीमांसकदुर्दुरूढः पापाणके कु
त्सितैः पूर्वस्यापवादः पापनापितः आणककुलालः उपमानानि सामान्यवचनैः घ
नश्यामः इह पूर्वपदं तत्पुरुषलाक्षणिकमिति सूचयितुं लौकिकविग्रहे इवशब्दः
प्रयुज्यते । पूर्वनिपातनियमार्थं सूत्रं उपमितं व्याघ्रादिभिः सामान्याप्रयोगे उपमेयं
व्याघ्रादिभिः सह प्राग्वत् साधारणधर्मस्याप्रयोगे सतीति विशेष्यस्य पूर्वनिपातार्थं सूत्रं पु
रुषव्याघ्रः नृसिंहः व्याघ्रादिराकृतिगणः सामान्याप्रयोगे किं पुरुषो व्याघ्र इव शूरः विशे

सि॰ कौ॰
तत्पु॰ सम॰
65

णं विशेष्येण बहुलं भेदकं समानाधिकरणेन भेद्येन बहुलं प्राग्वत् नीलमुत्पलं
नीलोत्पलं बहुलग्रहणात्क्वचिन्नित्यं कृष्णसर्पः क्वचिन्न रामो जामदग्न्यः ॥
पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च पूर्वनिपातनियमार्थमिदं पूर्ववैयाकरणः
अपराध्यापकः अपरस्यार्द्धं पश्चभावो वक्तव्यः अपरश्चासौ अर्द्धश्च पश्चार्द्धः कथमे
कवीर इति पूर्वकालैकेत्यादिना परत्वादनेन समासे वीरैक इति हि स्यात् बाहुलकाद्भवि
ष्यति श्रेण्यादयः कृतादिभिः श्रेण्यादिषु च्व्यर्थवचनं कर्तव्यं अश्रेणयः श्रेणयः कृ
ताः श्रेणिकृताः क्तेन नञ्विशिष्टेनानञ् कृतं चाकृतं च कृताकृतं शाकपार्थिवादीनां
सिद्धये उत्तरपदलोपस्योपसंख्यानं शाकप्रियः पार्थिवः शाकपार्थिवः देवब्राह्मणः
सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः सद्वैद्यः महांश्चासौ वैयाकरणश्च महावैयाकरणः
पूज्यमानैः किं उत्कृष्टो गौः पङ्कादुद्धृत इत्यर्थः वृन्दारकनागकुञ्जरैः पूज्यमानं गोवृन्दार
कः व्याघ्रादेराकृतिगणत्वादेव सिद्धे सामान्यप्रयोगार्थं वचनं कतरकतमौ जातिपरिप्रश्ने
कतरकठः कतमकलापः गोत्रं च चरणैः सहेति जातित्वं किं क्षेपे कुत्सितो राजा किंराजा

त॰
६५

योनस्त्वति पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्याप
यकधूर्तैर्जातिः। नसुरूपः समानाधिकरणाः कर्मधारयश्च पुंवत्कर्मधारयजातीयदेशीयेषु
कर्मधारयेजातीयदेशीययोश्चपरतोभाषितपुंस्कात्परं ङ भावो यस्मिन् तथाभूतं पुंवत्
हरणीप्रियादिषुप्राप्तः पुंवद्भावो विधीयते महानवमी कृष्णचतुर्दशी महाप्रिया तथा च
कोपधादेः प्रतिषेधः पुंवद्भावः कर्मधारयादौ प्रतिप्रसूयते याचकस्त्री दत्तभार्या पच
मभार्या हीनभार्या सुकेशभार्या ब्राह्मणभार्या एवं पाचकजातीया याचकदेशीयेत्या
दि इभपोटा पोटास्त्री पुंसलक्षणा इभयुवतिः अग्निस्तोकः उदश्वित्कतिपयं गृष्टिः स
कृत्प्रसूता गोगृष्टिः धेनुर्नवसूतिका गोधेनुः वशावन्ध्या गोवशा वेहद्गर्भघातिना
गोवेहत् बष्कयणी तरुणवत्सा गोबष्कयणी कठप्रवक्ता कठश्रोत्रियः कठाध्यापकः
कठधूर्तः प्रशंसावचनैश्च एतैः सह जातिः प्राग्वत् गोमतल्लिका गोमचर्चिका गोप्र
काण्ड गवोद्धः गोतल्लजः प्रशस्ता गौरित्यर्थः मतल्लिकादयो नियतलिङ्गा न तु विशेष्य
निघ्नाः जातिः किं कुमारी मतल्लिका

सं० तत्पु

सि० कौ०

६६

60

युवा खलतिपलितवलिनजरतीभिः । एवं निपातनं नियमार्थं सूत्रे लिङ्गविशिष्टपरिभाषया युवतिशब्दोपि
समस्यते युवा खलतिः युवखलतिः युवतिः खलती युवखलती युवा पलितः युवपलितः युवजर
ती युवतामेव जरतीधर्मोपलम्भेन तद्रूपारोपात् सामानाधिकरण्यं कृत्यतुल्याख्या अजात्या भोज
ष्णं तुल्यश्वेतः सदृशश्वेतः अजात्या किं भोज्य ओदनः प्रतिषेधसामर्थ्याद्विशेषणसमासोपि न
वर्णो वर्णेन समानाधिकरणेन सह प्राग्वत् कृष्णसारङ्गः कडाराः कर्मधारये कडारादयः शब्दाः
कर्मधारये वा पूर्वं प्रयोज्याः कडारजैमिनिः जैमिनिकडारः कुमारः श्रमणादिभिः कुमारी श्रम
णा कुमारश्रमणा इत्यादौ श्रमणा प्रव्रजिता गर्भिणी इत्यादयः स्त्रीलिङ्गाः पठ्यन्ते लिङ्गविशिष्टपरिभा
षया एते कुमारपक्षेपि बोध्यं । चतुष्पादो गर्भिण्या । चतुष्पाज्जातिवाचिनो गर्भिणीशब्देन सह प्राग्वत्
गोगर्भिणी मयूरव्यंसकादयश्च एते निपात्यन्ते मयूरो व्यंसको मयूरव्यंसकः व्यंसको धूर्त्तः उद
क् च अवाक् च उच्चावचं निश्चितं च प्रचितं च निश्चप्रचं नास्ति किंचन यस्य स अकिंचनः आख्यातमा
ख्यातेन क्रियासातत्ये अश्नीतपिबता इत्येवं सततं यत्राभिधीयते सा अश्नीतपिबता पचतभृज्जता
खादतमोदता एहीडादयोन्यपदार्थे एहीड इति यस्मिन् कर्मणि तत् एहीडं पाहि पचेति उद्धरको
कोष्ठात् उत्सृज देहीति यस्यां क्रियायां सा उद्धरोत्सृजा उद्धमविधमा । अमातत्सार्थवचनं जहि
कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति जहीत्येतत्कर्मणा बहुलं समस्यते आभीक्ष्ण्ये गम्य

६६

—× अपि प्रतीतिः

समासेन चेत्कर्ताऽभिधीयत इत्यर्थः जहिस्तोडं जहिस्तोडः जहिस्तम्बं जहिस्तम्बः नास्ति कुतो-
पि भयं यस्य सोऽकुतोभयः अन्यो राजा राजान्तरं चिदेव चिन्मात्रं ईषत्कडारा ईषत्पिङ्गलः
ईषद्गुणवचनेनेति वाच्यं ईषद्रक्तः नञ् नञ् सुपा समस्यते नलोपो नञः नञो नस्य लो-
नब्राह्मणः अब्राह्मणः पः स्यादुत्तरपदे अब्राह्मणः तस्मान्नुडचि लुप्तनकारान्नञ उत्तरपदस्याजादेर्नुडागमः
स्यात् अनश्वः अर्थाभावेऽव्ययीभावेन सहायं विकल्प्यते सोऽहाङ्गमलघुसदृशः प्रयोजनमि-
ति अद्रुतायामसंहितमिति च भाष्यवार्त्तिकप्रयोगात् तेनाऽनुपलब्धिरविवादोऽविप्रमिता
—ऽद्रिदम द्रिमिद्धं नञो नलोपस्तिङि क्षेपे अपचसि त्वं जाल्म नैकधेत्यादौ तु न शब्देन सह सुप्सुपेति
समासः नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषु प्रकृत्या
पादिति सूत्रं नतः वेदाऽस्य स्तीनेतः नसत्या असत्या न असत्या नासत्या न मुञ्चतीति नमु-
कुविमसरो चिः नकुलमस्य नाखमस्य नस्त्रीपुमान् स्त्रीपुंसयोः पुंसकभावो वा निपातनात् नक्ष-
तीति नक्षत्रं नीयतेऽत्र नेति वीत्तमिति निपात्यते नक्रामतीति नक्रः क्रमेर्डः नञ्चकोऽस्मिन्वि-
गोकि तिनाकः नगोऽप्राणिष्वन्यतरस्यां (विकल्पेन) नगइत्यत्र नञ् प्रकृत्या नगाः अगाः पर्वता अप्राणिषु कि-
अगोवृषलः शीतेन नित्यं क्रीडेत्यतो नित्यमित्यनुवर्तमाने कुगतिप्रादयः एते समर्थेन नि-
त्यं समस्यते कुत्सितः पुरुषः कुपुरुषः गतिश्चेत्यनुवर्तमाने ऊर्यादिच्विडाचश्च एते क्रि-
यायोगे गतिसंज्ञाः स्युः ऊरीकृत्य शुक्लीकृत्य पटपटाकृत्य

प्रकृत्यासमासेन समस्यते — यादृशास्यत्वान्नादृशार्थं हीति नञ्विकारश्च आभातीत्यर्थः

मः कं सिरस्त्वेन कं अकं दुःखं तस्मिन्नित्यर्थः =

नित्यं क्रीडाजीविकयोः =

समासेन नञ्पूर्वे क्त्वो ल्यप् अव्ययपूर्वपदेन समासे क्त्वो ल्यबादेशः ॥

ऊरीत्यस्य
ऊरीकृत्य इति स्थिते ऊर्यादिच्विडाचश्चेति गतिसंज्ञाकरणात्
पुनः कुगतीत्यनेन समासात् समासे नञ्पूर्वे इत्यने-
नाकात् ल्यप् स्यादेशात् ऊरीकृत्येति सिद्धं एवमन्यत्र समासे
एवं शुक्लीकृत्यादिष्वपि ज्ञेयम् =

67

कारिकाशब्दस्योपसंख्यानं कारिकाक्रिया कारिकाकृत्य अनुकरणं चानितिपरं खाट्कृत्य अ
नितिपरं किं खाडितिकृत्वा निरष्ठीवत् आदरानादरयोः सदसती सत्कृत्य असत्कृत्य भू
षणेऽलं अलंकृत्य भूषणे किं अलं कृत्वौदनं गतः पर्याप्तमित्यर्थः अनुकरणमित्यादि
त्रिसूत्री स्वभावात्कृञ्विषया अन्तरपरिग्रहे अन्तर्हत्य मध्ये हत्वेत्यर्थः अपरिग्रहे किं अन्तर्हत्वा
गतः हतं परिगृह्य गत इत्यर्थः कणेमनसी श्रद्धाप्रतीघाते कणेहत्य पयः पिबति मनोहत्य क
णेशब्दः सप्तमीप्रतिरूपको निपातोऽभिलाषातिशये वर्तते मनःशब्दोऽप्यत्रैव पुरोऽव्ययं पुर
स्कृत्य अस्तं च अस्तमिति मान्तमव्ययं गतिसंज्ञं स्यात् अस्तंगत्य अच्छगत्यर्थवदेषु अव्ययमित्ये
व अच्छगत्य अच्छोद्य अभिमुखं गत्वा उक्त्वा चेत्यर्थः अव्ययं किं जलमच्छं गच्छति अदोऽनु
पदेशे अदःकृत्यादः कृत्वा परं प्रत्युपदेशे तूदाहरणं॥ अदः कृत्वा इदं कुरु तिरोऽन्तर्धौ
तिरोभूय विभाषा कृञि तिरःकृत्य तिरस्कृत्य तिरःकृत्वा उपाजेऽन्वाजे एतौ कृञि वा गति
संज्ञौ उपाजेकृत्य उपाजेकृत्वा अन्वाजेकृत्य अन्वाजेकृत्वा दुर्बलस्य बलमाधायेत्यर्थः साक्षा
त्प्रभृतीनि च कृञि वा गतिसंज्ञानि स्युः च्व्यर्थ इति वक्तव्यं साक्षात्कृत्य साक्षात्कृत्वा लवणं
कृत्य लवणं कृत्वा मान्तत्वं निपातनात् अनत्याधान उरसिमनसी उरसिकृत्य उरसिकृत्वा
अभ्युपगम्येत्यर्थः मनसिकृत्य मनसिकृत्वा निश्चित्येत्यर्थः अत्याधानमुपश्लेषणं तत्र
न

उरसिकृत्य पाणावित्येतेन मध्येपदेनिवचनेच एतेकृञि गतिसंज्ञा वा स्युः अनत्याधाने मध्येकृत्य मध्येकृत्वा प
देकृत्य पदेकृत्वा निवचनेकृत्य निवचनेकृत्वा वाचंनियम्यार्थः नित्यं हस्ते पाणा
वुपयमने कृञि उपयमनं विवाहः स्वीकारमात्रमित्यन्ये हस्तेकृत्य पाणौकृत्य प्राध्वं बंधने
प्राध्वमित्यव्ययं प्राध्वंकृत्य बंधनेनानुकूल्यं कृत्वेत्यर्थः प्राध्वनाहिनाच्चानुकूल्यकरणे
प्राध्वंकृत्वा जीविकोपनिषदावौपम्ये जीविकामिवकृत्वा जीविकाकृत्य उपनिषत्कृत्य औप
म्ये किं जीविकांकृत्वा प्रादिग्रहणमगत्यर्थं "सुदुरोः" अत्र वार्तिकानि प्रादयो गताद्यर्थे प्रथम
या प्रगत आचार्यः प्राचार्यः "अत्यादयः क्रान्ताद्यर्थे द्वितीयया" अतिक्रान्तो मालामतिमालः
अवादयः क्रुष्टाद्यर्थे तृतीयया अवक्रुष्टः कोकिलया अवकोकिलः पर्यादयो ग्लानाद्यर्थे च
तुर्थ्या परिग्लानोऽध्ययनाय "पर्यध्ययनः" निरादयः क्रान्ताद्यर्थे पंचम्या निष्क्रान्तः कौ
शाम्ब्याः निष्कौशाम्बिः कर्मप्रवचनीयानां प्रतिषेधः "वृक्षं प्रति" तत्रोपपदं सप्तमीस्थम् सप्त
म्यंतपदे कर्मण्यणित्यादौ वाच्यत्वेन स्थितं कुंभादि तद्वाचकं पदमुपपदसंज्ञं स्यात् तस्मिं
श्च सत्येव वक्ष्यमाणः प्रत्ययः स्यात् "उपपदमतिङ्" उपपदं सुबन्तं समर्थेन नित्यं समस्यते
अतिङन्तश्चायं समासः कुंभंकरोतीति कुंभकारः इह कुंभ अस् कार इति लौकिकं प्रक्रियावाक्यं
अतिङ् किं माभवान्भूत् माङि लुङि इति सप्तमीनिर्देशान्माङ् उपपदं अतिङ्ग्रहणं ज्ञापय
ति सुपेति नेहानुवर्तते इति पूर्वसूत्रेऽपि गतिग्रहणं पृथक्कृत्वा उ तिङ्ग्रहणं तत्रापकृष्यते ॥

माभवान्भूदित्यत्र उपपदमतिङिति समासात्

कुगतीत्यत्र

६८

सुपेति च निवृत्तं । तथा च गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति सिद्धं । व्या-
घ्री । अश्वक्रीती । कच्छपी । अमैवाव्ययेन । अमैव तुल्यविधानं यदुपपदं तदेवाव्ययेन सह समस्य-
ते स्वादुंकारं नेह । कालसमयवेलासु तुमुन् । कालः समयो वेला वा भोक्तुं । अमैवेति किं
अग्रेभोजं अग्रेभुक्त्वा । विभाषाग्रेप्रथमपूर्वेष्विति क्त्वाणमुलौ । अमा चान्येन च तुल्यविधान-
मेतत् । तृतीयाप्रभृतीन्यन्यतरस्यां । उपदंशस्तृतीयायामित्यादीन्युपपदान्यमन्तेनाव्ययेन सह वा स-
मस्यन्ते । मूलकेनोपदंशं भुङ्क्ते मूलकोपदंशं । क्त्वा च । तृतीयाप्रभृतीन्युपपदानि क्त्वान्तेन सह वा समस्य-
न्ते । उच्चैःकृत्य उच्चैःकृत्वा । अव्ययेऽयथाभिप्रेतेति क्त्वा । तृतीयाप्रभृतीनीति किं । अलंकृत्वा खलेकृत्वा ।
तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः । संख्याव्ययादेस्तत्पुरुषस्य समासान्तोऽच् स्यात् । द्वे
अङ्गुली प्रमाणमस्य द्व्यङ्गुलं दारु । निर्गतमङ्गुलिभ्यो निरङ्गुलं । अहःसर्वैकदेशसंख्यातपुण्याच्च
रात्रेः । एभ्यो रात्रेरच् स्यात् । चात् संख्याव्ययादेः । अहर्ग्रहणं द्वन्द्वार्थं । अहश्च रात्रिश्च अहोरात्रः ।
सर्वरात्रः । पूर्वरात्रः । संख्यातरात्रः । पुण्यरात्रः । द्वयो रात्र्योः समाहारो द्वि-
रात्रं । अतिक्रान्तो रात्रिमतिरात्रः । राजाहःसखिभ्यष्टच् । एतदन्तात्तत्पुरुषाट्टच् स्यात् । परम-
राजः । अतिराजः । कृष्णसखः । अह्नष्टखोरेव । टिलोपः स्यात् तत्र । उत्तमाहः । द्वे अहनी
सम्भृतो द्व्यहीनः ॥ तद्धितार्थो द्विगुः । तमधीष्ट इत्यधिकारे द्विगोर्वेत्यनुवृत्तौ रात्र्यहः-
संवत्सराच्चेति खः ॥ लिङ्गविशिष्टपरिभाषयाऽनित्यत्वान्नेह मद्राणां राज्ञी मद्र-
राज्ञी ६८

अह्नोऽह्न एतेभ्यः सर्वादिभ्यः परस्याहन्शब्दस्याह्नादेशः स्यात् समासान्ते परे अह्नोऽदन्तात् अदन्तपूर्वप-
दस्थाद्रेफात् परस्याह्नो नस्य णः स्यात् सर्वाह्णः पूर्वाह्णः संख्याताह्नः द्वयोरह्नोर्भवः कालाट्ठञ् द्विगो-
र्लुगनपत्ये इति ठञो लुक् द्व्यह्नः स्त्रियामदन्तत्वाट्टाप् द्व्यह्ना द्व्यह्नस्त्रियः अत्यह्नः क्षुभ्नादिषु च एषु णत्व-
नेन स्यात् दीर्घाह्नी प्रावृट् एवं चैतदर्थमह्नष्टखोरनुकरणे णत्वाभावोऽपि न कर्तव्यः प्रातिपदिकान्तेति णत्ववारणाय ह्न-
भावस्यावश्यकत्वात् अदन्तादिति तपरकरणान्नेह परागतमहः पराह्नः न संख्यादेः समाहारे समाहा-
रे वर्तमानस्य संख्यादेरह्नादेशो न स्यात् संख्यादेरिति स्पष्टार्थं द्वयोरह्नोः समाहारः द्व्यहः त्र्यहः उत्तमै-
काभ्यां च आभ्यामह्नादेशो न उत्तमशब्दोऽन्त्यार्थः पुण्यशब्दमाह पुण्यैकाभ्यामित्येव सूत्रयितुमुचि-
तं पुण्याहं एकाहः उत्तमग्रहणमुपान्त्यस्यापि संग्रहार्थमित्येके संख्याताहः अग्राख्यायामुरसः टच् स्या-
त् अश्वानामुर इव अश्वोरसं मुख्योऽश्व इत्यर्थः अनोऽश्मायःसरसां जातिसंज्ञयोः टच् उपानसं अमृताश्मं
कालायसं मण्डूकसरसमिति जातिः महानसं अमृताश्मं लोहितायसं जलसरसमिति संज्ञा ग्रामकौटा-
भ्यां च तक्ष्णः ग्रामस्य तक्षा ग्रामतक्षः साधारण इत्यर्थः कुटीभवः कौटः स्वतन्त्रः स चासौ तक्षा च कौटत-
क्षः अतेः शुनः अतिश्वो वराहः अतिश्वी सेवा उपमानादप्राणिषु अप्राणिविषयकोपमानवाचिनः
शुनष्टच् स्यात् आकर्षः श्वेवाकर्षश्वः अप्राणिषु किं वानरः श्वेव वानरश्वा उत्तरमृगपूर्वाच्च सक्थ्नः चादुप-
मानात् उत्तरसक्थं मृगसक्थं पूर्वसक्थं फलकमिव सक्थि फलकसक्थं नावो द्विगोः नौशब्दान्तात् द्विगो- नाः
ष्टच् स्यात् अतद्धितलुकि द्वाभ्यां नौभ्यामागतं द्विनावरूप्यः द्विगोर्लुगनपत्ये इति अञ्चीतस्यापकर्षणा

इत्यादेर्नेलुक् । पंचनावप्रियः द्विनावं त्रिनावं अतद्धितलुकीति किं पंचभिर्नौभिः क्रीतः पंचनौः अर्द्धा
च अर्द्धनावं वक्तव्यम् स्यात् अर्द्धनावं नावोर्द्धं क्लीबत्वं लोकात् खार्याः प्राचां द्विगोरर्द्धाच्च खार्यां वा द्वि
खारं द्विखारी अर्द्धखारं अर्द्धखारी द्वित्रिभ्यामंजलेः टच् वा स्यात् द्विगौ द्व्यंजलं द्व्यंजलिः अतद्धितलु
कीत्येव द्वाभ्यामंजलिभ्यां क्रीतः द्व्यंजलिः ब्रह्मणो जानपदाख्यायां ब्रह्मान्तात् तत्पुरुषाट्टच् स्यात् स
मासेन जानपदत्वमाख्यायते चेत् सुराष्ट्रब्रह्मा सुराष्ट्रब्रह्मः कुमहद्भ्यामन्यतरस्याम् आभ्यां ब्र
ह्मणो वा टच् स्यात् तत्पुरुषे कुत्सितो ब्रह्मा कुब्रह्मः कुब्रह्मा आन्महतः समानाधिकरणजातीययोः
महतः आकारोऽन्तादेशः स्यात् समानाधिकरणे उत्तरपदे जातीये च परे महाब्रह्मः महाब्रह्मा महा
देवः महाजातीयः समानाधिकरणे किं महतः सेवा महत्सेवा लाक्षणिकं विहाय प्रतिपदोक्तः
सन्महदिति समासोऽत्र गृह्यते इति चेत् महाबाहुर्न स्यात् तस्मात् लक्षणप्रतिपदोक्तयोः प्रतिपदोक्त
स्येति परिभाषा नेह प्रवर्तते समानाधिकरणग्रहणसामर्थ्यात् आदिति योगविभागादात्वं प्रागेका
दशभ्य इति निर्देशाद्वा एकादश महतीशब्दस्य पुंवत्कर्मधारयेति पुंवद्भावे कृते आत्वं महाजाती
या महदादिविद्यामकर्विशिष्टपुंसंख्यानं पुंवद्भावस्य असमानाधिकरणार्थमिदं महतो मे हत्पावा
वासमहत्ग्रामः महाकरः महाविशिष्टः अष्टनः कपाले हविषि अष्टाकपालः गवि च युक्ते गोशब्दे प
युक्ते समर्थं गम्ये अष्टन आत्वं वक्तव्यमित्यर्थः अष्टागवं शकटं अत्र समासान्तेन वत्वमात्वं जिति योगविभागाद्वक्त
व्रीहावपूपे अष्टानां गवां समाहारोऽष्टगवं तद्युक्तं काककटं अष्टागवमिति अष्टनः संज्ञायामवक्री
अष्टावक्रः

६९ 69

आत्स्यात् द्वौ च दश च द्वादश द्व्यष्टाधिकादेशे तिवा द्वाविंशतिः अष्टादश अष्टाविंशतिः अबहुव्रीह्यशीतो।
किं द्विशाः द्व्यशीतिः प्राक्शतादित्युक्ते नेह द्विशतं द्विसहस्रं त्रेस्त्रयः त्रिशब्दस्य त्रयः स्यात् पूर्वविषये
त्रयोविंशतिः बहुव्रीहौ तु त्रिदशाः त्रिदशाः सुजर्थे बहुव्रीहिः अशीतौ तु त्र्यशीतिः प्राक्शतादिति
व त्रिशतं त्रिसहस्रं विभाषा चत्वारिंशत्प्रभृतौ सर्वेषां अष्टनो द्व्यस्य आ अयं वा स्यात् चत्वारिंशदादौ परे।
द्विचत्वारिंशत् द्वाचत्वारिंशत् अष्टचत्वारिंशत् अष्टाचत्वारिंशत् त्रिचत्वारिंशत् त्रयश्चत्वारिंशत् एवं
पंचाशत्षष्टिसप्ततिनवतिषु एकादिश्चैकस्य चादुक् एकादिर्नञ् प्रकृत्या स्यादेकस्य अदुगागमश्च नञो वि
शतासमर्थाच्छते एकशब्देन सह तृतीयेति योगविभागात्समासः अनुनासिकविकल्पः एकेन न विंशतिः
एकान्नविंशतिः एकाद्नविंशतिः एकोनविंशतिरित्यर्थः षष उत्वं दतृदशधासूत्तरपदादेः ष्टुत्वं च धासु वेति
वाच्यं षोडन् षोडशः षोढा षड्धा पुंवल्लिंगं द्वन्द्वतत्पुरुषयोः एतयोः परपदस्येव लिंगं स्यात् उरुजं
टेमसूर्यौ विमे मयूरीकुक्कुटौ विमौ अर्धपिप्पली द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वाच्यः
पंचसु कपालेषु संस्कृतः पंचकपालः पुरोडाशः प्राप्तो जीविकां प्राप्तजीविकः आपन्नजीविकः अलं
कुमार्यै अलंकुमारिः अत एव ज्ञापकात्समासः निष्कौशाम्बिः पूर्ववत् अश्ववडवौ द्विवचनमात्रं अश्ववडवौ अश्व
वडवान् अश्ववडवैः रात्राह्नाहाः पुंसि एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव अनन्तरत्वात् परवल्लिंगतापवादोऽ
यं परत्वात्समाहारनपुंसकतां बाधते अहोरात्रः रात्रेः पूर्वभागः पूर्वरात्रः पूर्वाह्णः द्व्यहः संख्यापूर्वं रात्रं
क्लीबं द्विरात्रं त्रिरात्रं गणरात्रं अपथं नपुंसकं तत्पुरुषः इत्येव अन्यत्र तु अपथो देशः कृतसमासा

70

तन्निर्देशान्नेह । अर्धर्चाः अर्धर्चौ पुंसि च । अर्धर्चादयः शब्दाः पुंसि क्लीबे च स्युः । अर्धर्चः अर्धर्चं ध्वजः ध्वजं एवं
तीर्थ शरीर मंडप यूप देह अंकुश कलश इत्यादि । जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां । एकोप्य
र्थो वा बहुवद्भवति । ब्राह्मणाः पूज्याः । ब्राह्मणः पूज्यः । अस्मदो द्वयोश्च । एकत्वे द्वित्वे च विवक्षिते अस्मदो बहुवा
चनं स्याद्वा । वयं ब्रूमः । वहं ब्रवीमि । आवां ब्रूव इति वा । सविशेषणस्य प्रतिषेधः । पटुरहं ब्रवीमि । फल्गुनी
प्रोष्ठपदानां च नक्षत्रे । द्वित्वे बहुत्वप्रयुक्तं कार्यं वा स्यात् । पूर्वे फल्गुन्यौ पूर्वाः फल्गुन्यः । पूर्वे प्रोष्ठपदे पूर्वाः
प्रोष्ठपदाः । नक्षत्रे किं फल्गुन्यौ माणविके । तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यं । बहुत्वे
द्विवत् भवति । तिष्यश्च पुनर्वसू च तिष्यपुनर्वसू । तिष्येति किं विशाखानुराधाः । नक्षत्रेति किं तिष्य
पुनर्वसवो माणवकाः । स नपुंसकं समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात् । परवल्लिङ्गतापवादः । पंचगवं द
न्तोष्ठं । अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः । पंचमूली । आबन्तो वा । पंचखट्वी पंचखट्वं । अनो नलोपश्च वा च
द्विगुः स्त्रियां । पंचतक्षं पंचतक्षी । पात्राद्यन्तस्य न । पंचपात्रं त्रिभुवनं चतुर्युगं । पुण्यसुदिनाभ्यामह्नः क्लीब
तेष्टा । पुण्याहं सुदिनाहं । पथः संख्याव्ययादेः । संख्याव्ययरूपादेः परः कृतसमासान्तः पथशब्दः क्लीबं स्या
त् । त्रयाणां पन्थाः त्रिपथं । विरूपः पन्थाः विपथं । कृतसमासान्तग्रहणान्नेह सुपन्थाः । सामान्ये नपुंसकं ।
मृदु पचति । प्रातः कमनीयं । तत्पुरुषोऽनञ्कर्मधारयः । अधिकारोऽयं । संज्ञायां कन्थोशीनरेषु । कन्थान्तस्तत्पुरु
षः क्लीबं स्यात् सा चेदुशीनरदेशोत्पन्नायाः कन्थायाः संज्ञा । सुशमस्यापत्यानि सौशमयः । तेषां कन्था सौशमि
कन्थं । संज्ञायां किं । वीरणकन्था । उशीनरेषु किं । दाक्षिकन्था । उपज्ञोपक्रमं तदाद्याचिख्यासायां । उपज्ञान्त उपक्रमा
न्तश्च तत्पुरुषो नपुंसकं स्यात् । तयोरुपज्ञायमानोपक्रम्यमाणयोरादिः प्राथम्यं चेदाख्यातुमिष्यते ॥

पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रन्थः । नंदोपक्रमं द्रोणाः । छायाबाहुल्ये छायायां तत्पुरुषो नपुंसकं स्यात् । पूर्वपदा
र्थबाहुल्ये इक्षूणां छाया इक्षुच्छायं विभाषासेनेति विकल्पस्यापवादः । इक्षुच्छायानिषादिन इति तु आस
त्तान्निषादिन्यः स्यादिति व्याख्येयं वा । सभा राजाऽमनुष्यपूर्वा । राजपर्यायपूर्वोऽमनुष्यपूर्वश्च सभांतस्तत्पु
रुषो नपुंसकं स्यात् । इनसभं । पर्यायस्यैवेष्यते नेह राजसभा । चंद्रगुप्तसभा । अमनुष्यशब्दो रूढ्या रक्षःपिशाचा
दीनाह । रक्षःसभं । पिशाचसभं । अशाला च । संघातार्था या सभा तदंतस्तत्पुरुषः क्लीबं स्यात् । स्त्रीसभं स्त्रीसंघा
त इत्यर्थः । अशाला किं धर्मसभा धर्मशालेत्यर्थः । विभाषा सेनासुराछायाशालानिशानां । एतदंतस्तत्पुरुष
क्लीबं वा स्यात् । ब्राह्मणसेनं ब्राह्मणसेना । यवसुरं यवसुरा । कुड्यछायं कुड्यछाया । गोशालं गोशाला
श्वनिशं श्वनिशा । तत्पुरुषो नञ्कर्मधारयः । स नपुंसकं नेह । दृढसेनो राजा । असेना । परमसेना । इति तत्पु
रुषः । शेषो बहुव्रीहिः । अधिकारोऽयं प्राग्द्वंद्वात् । द्वितीया श्रितेत्यादिना यस्य त्रिकस्य विशिष्य समासो
नोक्तः स शेषः प्रथमांत इत्यर्थः । अनेकमन्यपदार्थे । अनेकं प्रथमांतमन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स
बहुव्रीहिः । अप्रथमाविभक्त्यर्थे बहुव्रीहिरिति समानाधिकरणानामिति च फलितं । प्राप्तमुदकं यं प्राप्तोदको
ग्रामः । ऊढरथोऽनड्वान् । उपहृतपशू रुद्रः । उद्धृतौदना स्थाली । पीतांबरः । वीरपुरुषो ग्रामः । प्रथमार्थे तु न । वृ
ष्टे देवे गतः । व्यधिकरणानामपि न । पंचभिर्भुक्तमस्य । प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः । प्रपतित
पर्णः प्रपर्णः । नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः । अविद्यमानपुत्रः अपुत्रः । अस्तीति विभक्तिप्रतिरूपकमव्ययं
अस्तिक्षीरा गौः । स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु । भाषितपुंस्काद

71

न ऊङ् ऊङो भावो ऽस्यामिति वा बहुव्रीहिः निपातनात् पंचम्या अलुक् षष्ठ्या अलुक् तुल्यप्रवृत्तिनिमित्तं यदुक्तपुं
स्कं तस्मात्पर ऊङो भावो यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात् समानाधिकरणे स्त्रीलिं
ग उत्तरपदे न तु पूरण्यां प्रियादौ च परतः गोस्त्रियोरिति ह्रस्वः चित्रा गावो यस्येति लौकिकविग्रहे चित्रा अ
स् गो अस् इत्यलौकिकविग्रहे चित्रगुः रूपवद्भार्यः चित्रा जरती गौर्यस्येति विग्रहे अनेकोक्तौ बहूनां
बहुव्रीहिः अत्रैके चित् चित्राजरतीगुः जरतीचित्रागुर्वा एवं दीर्घातन्वीजंघः त्रिपदे बहुव्रीहौ प्रथमेन
पुंवत् उत्तरपदस्य मध्यमेन व्यवधानात् द्वितीयमपि न पुंवत् पूर्वपदत्वाभावात् उत्तरपदशब्दो हि समासस्य चरमा
वयवे रूढः पूर्वपदशब्दस्तु प्रथमावयवे इति वदंति वस्तुतस्तु नेह पूर्वपदमाक्षिप्यते आनङृतः स्व यथाते
नोपात्तस्य पुंवद्भावे चित्राजरद्गुरित्यादि अत एव चित्राजरत्यो गावो यस्येति द्वंद्वगर्भेऽपि चित्राजरद्गुरिति भा
ष्यं ॥ कर्मधारयपूर्वपदे तु द्वयोरपि पुंवत् चित्रजरद्गुः जरच्चित्रगुः कर्मधारयोत्तरपदे तु चित्रजरद्गवीकः
स्त्रियाः किं ग्रामणिकुलं दृष्टिरस्य ग्रामणिदृष्टिः भाषितपुंस्कात्किं गंगाभार्यः अनूङ् किं वामोरू
भार्यः समानाधिकरणे किं कल्याण्याः माता कल्याणीमाता स्त्रियां किं कल्याणी प्रधानं यस्य स कल्याणी
प्रधानः पूरण्यां तु अपूरणीप्रमाण्योः पूरणार्थप्रत्ययांतं यत्स्त्रीलिंगं तदंतात्प्रमाण्यंताच्च बहुव्रीहेरप्
स्यात् कल्याणी पंचमी यासां रात्रीणां ताः कल्याणीपंचमा रात्रयः स्त्री प्रमाणी यस्य स स्त्रीप्रमाणः पुंवद्भाव
निषेधः अप्प्रत्ययश्च प्रधानपूरण्यामेव रात्रिः पूरणीवाच्या चेत्तु केवलोदाहरणं मुख्यं अन्यत्र तु न यथा तस्य न पु
त्रपदाहृतोत्तरपदाच्च बहुव्रीहेः कप्स्यात् पुंवद्भावः केणः केऽणो ह्रस्वः स्यादिति प्राप्ते ॥ न कपि
कपि परे ऽणो ह्रस्वो न स्यात् कल्याणीपंचमीकः पक्षः अत्र तिरोहितावयवभेदस्य पक्षस्यान्यपदार्थतया
रात्रिः प्रधान

अत्रापूरण्यार्थेऽस्ति तदा कल्याणीपंचमे तिपुंवत्त्वं न

तिरोहितोऽवयवभेदो यस्य सः तथा

चित्रादयः स्त्रीसमानाधिकरणाः स्त्रीभावात्

७२

बहुकर्तृके। अप्रियादिषु किं। कल्याणीप्रियः। प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्ति सचिवा स्वसा कां
ता क्षान्ता समा चपला दुहिता वामा अबला तनया सामान्येन नपुंसकम्। दृढभक्तिर्यस्य सः दृढभक्तिः स्त्री
त्वविवक्षायां तु दृढभक्तिः। तसिलादिष्वाकृत्वसुचः। तसिलादिषु कृत्वसुजन्तेषु स्त्रियाः पुंवत्स्यात्। परिगणना
त्कर्तव्यं। अन्यां प्रति व्याप्तिपरिहाराय। तस्यां तरतमपौ चरड्जातीयरौ कल्पप् देशीयरौ रूपप्पाशपौ थाल्
तिल् थ्यालौ बह्वीषु बहुत्र बहुतः दर्शनीयतरा दर्शनीयतमा बहुप्पति बहुमात्रा ह्रस्वः परत्वात् पुंवद्भाव
बाधते पटुतरा पटुतमा पटुचरी पटुजातीया दर्शनीयकल्पा दर्शनीयदेशीया दर्शनीयरूपा दर्शनीय
पाशा बहुधा ... भीति अजाभ्याहिता अजेष्या त्रासिवच्च ... पुंवद्भावो वक्तव्यः बह्वी
भ्यो देहीति बहुशः अल्पशः त्वतलोर्गुणवचनस्य शुक्लायाः भावः शुक्लत्वं शुक्लता गुणवचनस्य किं
कर्त्र्या भावः कर्त्रीत्वं शस्त्रः कृताः तत्र त्वादौ तु सामान्ये नपुंसकं भस्याढे तद्धिते हस्तिनां समूहो हास्तिकं
ढकि रौहिणेयः स्त्रीभ्यो ढगिति ढोगस्यते अग्नेर्ढगिति ढकि तु पुंवदेव अग्नायी देवतास्य स्थालीपाकस्य आग्नेयः स
पत्नीशब्दस्त्रिधा शत्रुपर्यायात् सपत्नीशब्दात् ... इत्यादि ... समानः पतिर्यस्याः इति विग्रहे विवाहनिबंध
ने पतिशब्दस्यास्ति ... स्त्रीलिङ्गो द्वितीयः स्वामिपर्यायपतिशब्देन भाषितपुंस्कस्तृतीयः अत्राद्ययोः शिवाद्य
ण् सपत्न्याः अपत्यं सापत्नः तृतीयात्तु लिङ्गविशिष्टपरिभाषया पत्युत्तरपदलक्षणो ण्य एव न तु अण् शिवा
द्यण् ... ग्रहणात् सापत्न्यः ... भवतोष्ठक्छसौ भावतः भवदीयाः ... तद्धितेः सर्वकं तद्धितैः
वचनकर्तव्यं सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः ... सर्वमयः सर्वकाम्यति सर्विका
भार्या यस्य सः सर्वकभार्यः सर्वप्रियः इत्यादि पूर्वस्मिन्वेदे ... तेनाकच्येकशेषवृत्तौ वचनस
विका कारिका

कुक्कुट्यादीनामण्डादिषु कुक्कुट्या अण्डं कुक्कुटाण्डं मृग्याः पदं मृगपदं मृगक्षीरं काकशावः क्यङ्मानि
नोश्च एतयोः परतः पुंवत् एनीवाचरति एतायते श्येनीवाचरति श्येतायते स्वभिन्नां कांचिद्दर्शनीयां मन्य
ते दर्शनीयमानी दर्शनीयां स्त्रियं मन्यते दर्शनीयमानी चैत्रः न कोपधायाः कोपधायाः स्त्रियाः न पुंवत्
पाचिकाभार्यः रसिकाभार्यः मद्रिकायते माद्रिकामानिनी कोपधप्रतिषेधे तद्धितवुग्रहणं नेह पाकाभार्यो
यस्य स पाकभार्यः संज्ञापूरण्योश्च अनयोर्न पुंवत् दत्ताभार्यः दत्तामानिनी दानक्रियानिमित्तः स्त्रियाः पुंसि
च संज्ञा मे तायमिति भाषितपुंस्कत्वमस्ति पंचमीभार्यः पंचमीपाशः वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे वृद्धि
शब्देन विहिता या वृद्धिस्तद्धेतुर्यस्तद्धितस्तदन्ता स्त्री न पुंवत् स्रौघ्नीभार्यः माथुरीयते माथुरीमानिनी वृद्धिनि
मित्तस्य किं मध्यमभार्यः तद्धितस्य किं काण्डलावभार्यः वृद्धिशब्देन किं तावद्भार्यः रक्ते तु काषायी कन्था यस्य स
काषायकन्थः विकारे तु हैमी मुद्रिका यस्य स हैममुद्रिकः वृद्धिशब्देनेह वृद्धिः इति फलोपधानाभावादिह पुंवत्
वैयाकरणभार्यः सौवश्वभार्यः स्वाङ्गाच्चेतः स्वाङ्गाद्य ईकारस्तदन्ता स्त्री न पुंवत् सुकेशीभार्यः स्वाङ्गा
त्किं पटुभार्यः ईतः किं अकेशभार्यः अमानिनीति वक्तव्यं सुकेशमानिनी जातेश्च जातेः परो यः
प्रत्ययस्तदन्तं न पुंवत् शूद्राभार्यः ब्राह्मणीभार्यः सौत्रोऽयं निषेधः तेनेह हस्तिनीनां समूहो हास्ति
कमित्यत्र भस्याढे तद्धिते इति भवत्येव संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये संख्येयार्थया संख्य
याऽव्ययादयः सह बहुव्रीहिः दशानां समीपे ये सन्ति ते उपदशाः नवैकादश वेत्यर्थः बहुव्रीहौ सं
ख्येये इति वक्ष्यमाणो डच् ति विंशतेर्डिति विंशतेर्भस्य तेर्लोपः स्यात् डिति आसन्नविंशाः विंशतेरा
सन्नाः इत्यर्थः ॥

त्रिंशतेरष्टत्वाः अष्टत्रिंशाः =१ अत्र पूर्वोक्तेन त्रिंशतेर्तिशब्दस्य टेर्लोपः =२
योगरूढाः यौगिकाः नामाः तेषां चत्वारिंशतेरधिका अधिकचत्वारिंशाः =१
अत्रापि चत्वारिंशतेर्तिशब्दस्य टेर्लोपः =२
नेत्यर्थः =३
समानः रूपो यस्य सप्तम्यन्त तृतीयान्तस्य =७
वार्थे बहुव्रीहिः ४

ऐन्द्र्यां कौबेर्यां नऐन्द्रीनामानः
कौबेर्यां च अन्ये कौबेरीनामानः
इमे यौगिकनामा अत्र
समासो न किन्तु वाक्यमेव =३
सरूपे =
तृतीयान्ते युद्धे प्रवृत्ते कर्मव्यतिहारे
समानरूपे =

दिशोर्नाम दिङ्नामानि तेषां =

पूर्वोक्ते सूत्रे =२

अष्टात्रिंशाः अधिकचत्वारिंशाः द्वौ वा त्रयो वा द्वित्राः द्विरावृत्ता दश द्विदशाः विंशतिरित्यर्थः दिङ्नामान्यन्तराले
दिशोर्नाम्नी अन्तराले वाच्ये प्राग्वत् दक्षिणस्याः पूर्वस्याश्च दिशोरन्तरालं दक्षिणपूर्वा नामग्रह
णाद्यौगिकानां न ऐन्द्र्याश्च कौबेर्याश्चान्तरालं तत्र तेनेदमिति सरूपे सप्तम्यन्ते ग्रहणवि
षये सरूपे तृतीयान्ते च प्रहरणविषये इदं युद्धमित्यर्थे समस्यते कर्मव्यतिहारे स बहुव्रीहिः
प्रतिपादनाद्यविषयविशेषो लभ्यते अन्येषामपि दृश्यते दीर्घः स्मानुवर्तते इति कर्मव्यतिहारे
बहुव्रीहौ पूर्वपदान्तस्य दीर्घः इच् समासान्तो वक्तव्यः तिष्ठद्गुप्रभृतिषु इच्प्रत्ययपाठादव्ययीभावा
त्मव्ययत्वं च केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि दण्डैश्च दण्डैश्च प्रहृत्येदं यु
द्धं प्रवृत्तं दण्डादण्डि मुष्टामुष्टि ओर्गुणः उवर्णान्तस्य भस्य गुणः स्यात् तद्धिते अवादेशः बाहूबाहवि
ओरादिति वक्तव्ये गुणोक्तिः संज्ञापूर्वको विधिरनित्य इति ज्ञापयितुं तेन स्वायंभुवमित्यादि सिद्धि
हं सर्वेषां हलेन मुशलेन तेन सहेति तुल्ययोगे तुल्ययोगे वर्तमानं सहेत्येतत्तृतीयान्तेन प्रा
ग्वत् वा उपसर्जनस्य बहुव्रीहेरवयवस्य सहस्य सः स्यात् पुत्रेण सह सपुत्रः सहपुत्रो वाग
तः तुल्ययोगवचनं प्रायिकं सकर्मकः सलोमकः प्रकृत्याशिषि सहशब्दः प्रकृत्या स्यादा
शिषि स्वस्ति राज्ञे सहपुत्राय सहामात्याय अगोवत्सहलेष्विति वाच्यं सगवे सवत्साय सहलाय
बहुव्रीहौ संख्येये डजबहुगणात् संख्यया यो बहुव्रीहिस्तस्माड्डच् स्यात् उपदशाः अबहुग
णात् किं

स॰ वृ॰
सि॰ कौ॰
७३

उपबहवः उपगणाः अत्र बहुव्रीहौ विशेषः संख्यायास्तत्पुरुषस्य वाच्यः निर्गतानि त्रिंशतो निस्त्रिंशानि वर्षा
णि चैत्रस्य निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् वर्त्तयेन ब
हुव्रीहौ स्वाङ्गवाचिनः सक्थ्यक्ष्णोरन्ताद्बहुव्रीहेः षच् स्यात् दीर्घसक्थिनी यस्य स दीर्घसक्थः जलजाक्षी
स्वाङ्गात्किं दीर्घसक्थि शकटं स्थूलाक्षा वेणुयष्टिः अक्ष्णोऽदर्शनादित्यच् अङ्गुलेर्दारुणि अङ्गु
ल्यन्ताद्बहुव्रीहेः षच् स्याद्दारुण्यर्थे पञ्चाङ्गुलयो यस्य तत्पञ्चाङ्गुलं दारु । अङ्गुलिसदृशाव
यवधान्यादिविक्षेपकाष्ठमुच्यते बहुव्रीहेः किं द्वे अङ्गुली प्रमाणमस्याः द्व्यङ्गुला यष्टिः तद्धि
तेति न तु पुरुषे तत्पुरुषस्याङ्गुलेरित्यच् दारुणि किं पञ्चाङ्गुलिर्हस्तः द्वित्रिभ्यां ष मूर्ध्नः आभ्याम
र्ध्नः षः स्याद्बहुव्रीहौ द्विमूर्धः त्रिमूर्धः नेतुर्नक्षत्रे अब्वक्तव्यः मृगो नेता यासां ता मृगनेत्रा रात्र
यः पुष्यनेत्राः अन्तर्बहिर्भ्यां च लोम्नः आभ्यां लोम्नोऽप् स्याद्बहुव्रीहौ अन्तर्लोमः बहिर्लोमः
अञ्नासिकायाः संज्ञायां नसं चास्थूलात् नासिकान्ताद्बहुव्रीहेरच् स्यान्नासिकाशब्दस्थाने नसं स्या
त् न तु स्थूलशब्दात् पूर्वपदात्संज्ञायामगः पूर्वपदस्थान्निमित्तात्परस्य नस्य णः स्यात्संज्ञायां न तु ग
कारव्यवधाने द्रुरिव नासिका अस्य द्रुणसः खरणसः अगः किं ऋचामयनं ऋगयनं आएगय
नादिषु इति निपातनान्नत्वाभावमाश्रित्य अग इति प्रत्याख्यातं भाष्ये अस्थूलात्किं स्थूलनासि
कः खुरखराभ्यां वा नस् खुरणाः खरणाः पक्षेऽजपीष्यते खुरणसः खरणसः उपसर्गाच्च प्रा
दियोगे नासिकाशब्दस्य तदन्ताद्बहुव्रीहेरच् नासिकायाः नसादेशः अस्थूलात् एकवचने उन्नता नासिका यस्य
उन्नसः

नासिकाऽन्तात्... खुरा नासिका... खरा नासिका... उन्नासिकः ... ॥ १० ॥

विनसेति तृतीयैक

प्रगतनासिकः प्रग्रस्तथा = २

वैरूपमन्ये तथा याः नासिकायाः ग्रो भवतीत्यर्थः = २

उपसर्गाद्बहुलमिति = १

कारैक स्वर्णरिपात =

नासिकाः निवृत्ताः

उपसर्गाद्बहुलमिति सूत्रस्य भाष्यकारमाह उपसर्गाद्बहुलम् उपसर्गात्परस्मान्निमित्तात्परस्य
नसो नसादेशः स्याद्बहुलम् प्रणसः वेर्ग्रो वक्तव्यः विगता नासिका विग्रः ख्यश्च विख्यः कथं
तर्हि विनसा हतबान्धवेति भट्टिः विगतया नासिकया उपलक्षितेति व्याख्येयं सुप्रातसुश्व
सुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः एते बहुव्रीहयोऽच्प्रत्ययान्ता निपा-
त्यन्ते शोभनं प्रातरस्य सुप्रातः शोभनं श्वोऽस्य सुश्वः शोभनं दिवास्य सुदिवः शारेरिव कुक्षिरस्य
शारिकुक्षः चतस्रोऽश्रयो यस्य चतुरश्रः एण्या इव पादावस्य एणीपदः अजपदः प्रोष्ठो गौ-
स्तस्येव पादावस्य प्रोष्ठपदः नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्याम् अच् स्यात् अहलः अहलिः
असक्थः असक्थि एवं दुःसुभ्यां शक्त्योरिति पाठान्तरं अशक्तः अशक्तिः नित्यमसिच्
प्रजामेधयोः नञ्दुःसुभ्य इत्येव अप्रजाः दुःप्रजाः सुप्रजाः अमेधाः दुर्मेधाः सुमेधाः ध-
र्मादनिच्केवलात् केवलात्पूर्वपदात्परो यो धर्मशब्दस्तदन्ताद्बहुव्रीहेरनिच् स्यात् केव-
लाद्धर्मात् किं परमः स्वो धर्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत् स्वपदेऽपि हीनकेवले
एवं पदं किंतु मध्यमपदापेक्षिक सहिय साध्यधर्मत्वादेव कर्मधारयपूर्वपदो बहुव्री-
हिः एवं तु परमस्वधर्मत्यादि सिद्धमेव निर्धनिधर्मा अनुच्छिन्नधर्मत्वादिवत् एवं पदं तु बहु-
व्रीहिणा निष्पन्ने जम्भा सुहरिततृणसोमेभ्यः जम्भेति कृतसमासान्तो निपात्यते जम्भा भ-
क्ष्यं तेन च शोभनो जम्भोऽस्य सुजम्भा हरितजम्भा तृणं भक्ष्यं यस्य तृणजम्भा मितिदन्तादेशः
तृणजम्भा एवं सोमजम्भा स्वादिभ्यः किं पद

विगतनासिकस्य विग्रः = २

निपातिना सिद्धाने = ४

इतरेतरमालुब्धयोगे इतरेतरर्द्देभ्रतांयस्य दतितोर्मासृगः व्याधेनहतत्रणोऽस्मर्थः इच्कर्म
व्यतिहारे कर्मव्यतिहारे यावद्बहुव्रीहिस्तस्मादिच्समासांतः केशाकेशि मुशलामुशलि
हिदंग्राहिम्य स्मुन्ता दर्थे च तद्योरबालिध्यर्थे मिनुप्रत्ययः स्यात् द्वौदंडौयस्मिन्प्रहर
णे तद्द्विदंडि द्विमुशलि उभाहस्तौ यस्मिन्प्रहरणे तत् उभाहस्ति उभयाहस्ति प्र
संभ्यां जानुनोर्ज्ञुः प्रसंभ्यां परयोर्जानुशब्दयोर्ज्ञुरादेशः स्यात् बहुव्रीहौ प्रगते जानुनी
यस्य प्रज्ञुः संज्ञुः ऊर्ध्वाद्विभाषा ऊर्ध्वज्ञुः ऊर्ध्वजानुः धनुषश्च धनुरंतस्य बहुव्रीहेर
नङादेशः स्यात् शार्ङ्गधन्वा वासवधन्वा शतधन्वा शतधनुः जायाया निङ् ॥
जायांतस्य बहुव्रीहेर्निङादेशः स्यात् लोपो व्योर्वलि वकारयकारयोर्लोपः स्याद्व
लि युवजानिः युवतिर्जाया यस्य युवजानिः गंधस्येदुत्पूतिसुसुरभिभ्यः एभ्यो गंधस्येकारां
तादेशः स्यात् उद्गंधिः पूतिगंधिः सुगंधिः सुरभिगंधिः गंधस्येत्तदेकांतग्रहणं ए
कांतेप्येकदेशाद्व अविभागेन लक्ष्यमाणत्वार्थः सुगंधि पुष्पं सलिलं च सुगंधिर्वा
युः नेह शोभना गंधा द्रव्याण्यस्य सुगंध आपणिकः अल्पाख्यायां सूपस्य गंधो ले
शो यस्मिन् तत्सूपगंधि भोजनं

तृणस्य गंधो लेशो यस्मिन्‌ तत्

कोशः

घृतगंधिः गंधो गंधक आमोदे लेशे संबंधगर्वयोरिति विश्वः उपमानाच्च पद्मस्येव गंधो यस्य
पद्मगंधिः पादस्य लोपोऽहस्त्यादिभ्यः हस्त्यादिवर्जितादुपमानात्परस्य पादशब्दस्य लोपः स्याद्ब
हुव्रीहौ स्यान्निह्वरेणायं समासः व्याघ्रस्येव पादावस्य व्याघ्रपात् अहस्त्यादिभ्यः किं हस्तिपादः
कुसूलपादः कुंभपदीषु च कुंभपद्यादिषु पादस्य लोपो ङीप् च निपात्यते स्त्रियां पादः पत् कुं
भपदी स्त्रियां किं कुंभपादः संख्यासुपूर्वस्य पादस्य लोपः स्यात्समासांते बहुव्रीहौ द्विपात्
सुपात् वयसि दंतस्य दतृ संख्यासुपूर्वस्य दंतस्य दतृ स्यात्समासांते बहुव्रीहौ द्विदन् च
तुर्दन् षड्दंता अस्य षोडन् सुदन् सुदती वयसि किं द्विदंतः करी सुदंतः स्त्रियां संज्ञायां दं
तस्य दतृ स्यात् समासांते बहुव्रीहौ अयोदती फालदती संज्ञायां किं समदंती विभाषा
श्यावारोकाभ्यां दंतस्य दतृ बहुव्रीहौ श्यावदन् श्यावदंतः अरोकदन् अरोकदंतः
अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च एभ्यो दंतस्य दतृ वा कुड्मलाग्रदन् कुड्मलाग्रदंतः क
कुदस्यावस्थायां लोपः अजातककुत् पूर्णककुत् त्रिककुत्पर्वते त्रीणि ककुदान्यस्य
त्रिककुत् संज्ञैषा पर्वतविशेषस्य त्रिककुदोऽन्यः उद्विभ्यां काकुदस्य लोपः उत्काकुत् विका
कुत् काकुदं तालु पूर्णाद्विभाषा पूर्णकाकुत् पूर्णकाकुदः सुहृद्दुर्हृदौ मित्रामित्रयोः।
सुदुर्भ्यां हृदयस्य हृद्भावो निपात्यते सुहृन्मित्रं दुर्हृदमित्रं अन्यत्र सुहृदयः दुर्हृदयः।

75

स-ब-
सि-कौ-
७४

उरःप्रभृतिभ्यः कप् विग्रहे एकवचनांतेभ्य उरस्यादिभ्यः कप् व्यूढोरस्कः प्रियसर्पिष्कः इह पुमान् अन
ड्वान् पयः नौर्लक्ष्मीरिति एकवचनान्तानि पठ्यन्ते द्विवचनबहुवचनान्तेभ्यस्तु शेषाद्विभाषेति विक
ल्पेन कप् द्विपुमान् द्विपुंस्कः अर्थान्नञः अनर्थक नञः किं अपार्थं अपार्थकं इनः स्त्रियां
बहुदण्डिका नगरी अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्तीति बहु
वाग्मिका स्त्रियां किं बहुदण्डी बहुदण्डिको ग्रामः शेषाद्विभाषा अनुक्तसमासान्ताच्छेषाधि
कारस्था बहुव्रीहेः कब्वा स्यात् महायशस्कः महायशाः अनुक्तेत्यादि किं व्याघ्रपात् सुगं
धिः प्रियपथः शेषाधिकारस्था किं उपबहवः उत्तरपूर्वा सपुत्रः तत्रादिनाशेषग्रहणाद्ऽर्थव
यपरः आपोऽन्यतरस्यां कपि आपं तस्य ह्रस्वो वा स्यात् बहुमालकः बहुमालाकः कबभावे ब
हुमालः न संज्ञायां शेषादिति प्राप्तः कप् न स्यात् संज्ञायां विश्वे देवा अस्य विश्वदेवः ईयसश्च ईयस
न्तोत्तरपदान्न कप् बहवः श्रेयांसो यस्य बहुश्रेयान् गोस्त्रियोरिति ह्रस्वे प्राप्ते ईयसो बहुव्रीहे नेति
वे वाच्य ह्रस्वः श्रेयस्यो यस्य बहुश्रेयसी बहुव्रीहेः किं अतिश्रेयसिः वन्दिते भ्रातुः पूजितेऽर्थे यो
भ्रातृशब्दस्तदन्तान्न कप् स्यात् प्रशस्तो भ्राता यस्य प्रशस्तभ्राता सुभ्राता नद्यृतश्चेति निषेधः
बहुव्रीहौ सक्थ्यक्ष्णोरिति तः प्रागेव तिवर्तन्ते वन्दिते किं मूर्खभ्रातृकः नाडीतन्त्र्योः स्वांगे स्वांगे
ये नाडीतन्त्रीशब्दौ तदन्तात् कप् न स्यात् बहुनाडिकायः बहुतन्त्री ग्रीवा तन्त्री धमनी स्वीघतायां तत
भावाद्ध्रस्वान ॥

ह्यांगे किं वहुनाशीकः स्रेमः वहुतंत्रीकावीणा निष्प्रवाणिश्च कवभावोत्रनिपात्यते प्रपूर्वाद्वयतेर्ल्युट् प्र
वाणीतंतुवायशलाका निर्गताप्रवाणीअस्य निष्प्रवाणिःपटः समासवान् नवइत्यर्थः सप्तमीविशेषणे
वहुव्रीहौ सप्तम्यंतविशेषणंवहुव्रीहौपूर्वंप्रयोज्यं कंठेकालः अतएवज्ञापकाद्व्यधिकरणपदोवहुव्री
हिः चित्रगुः सर्वनामसंख्ययोरुपसंख्यानं सर्वश्वेतः द्विशुक्लः मिथोनयोःसमासेसंख्याप्रवेशाद्भूप
रविप्रतिषेधात् द्व्यन्यः संख्यायां अल्पीयस्याः द्वित्राः द्वंद्वेपि द्वादश वाप्रियस्य गुडप्रियः प्रियगुडः
गड्वादेः परासप्तमी गडुकंठः क्वचिन्न वहेगडुः निष्ठा निष्ठांतंवहुव्रीहौपूर्वंस्यात् कृतकृत्यः जातिका कृतकृत्यः निष्ठा ६
लसुखादिभ्यः परानिष्ठावाच्या सारंगजग्धी मासजाता सुखजाती प्रायिकंचेदं कृतकंठः पीता
म्वकः वाहिताग्न्यादिषु आहिताग्निः अग्न्याहितः आकृतिगणोऽयं प्रहरणार्थेभ्यः परानिष्ठासप्तम्यौ
अस्युद्यतः दंडपाणिः क्वचिन्न विहृतासिः ॥७॥ इतिवहुव्रीहिः ॥७॥४ ॥ समुच्चयान्वाचयेतरेतरयोगसमाहाराः परस्परनिर च समाहारा
वर्ते चार्थेद्वंद्वः अनेकंसुवंतं चार्थेवर्तमानंवासमस्यतेसद्वंद्वः समुच्चयान्वाचयेतरेतरयोगार्थाः मिलितानामन्वय
येनस्याने कस्यएकस्मिन्नन्वयः समुच्चयः अन्यतरस्यानुषंगिकत्वेनान्वयोऽन्वाचयः भिक्षामट गांचानयेत्यन्वाचये नस
इतरेतरयोगः समाहारः तत्रईश्वरंगुरुंचभजस्वेतिसमुच्चये भिक्षामट गांचानयेत्यन्वाचये नस
मासोसामर्थ्यात् धववदिरौसंज्ञापरिभाषं अनेकोक्तेः होतृपोतनेष्टोद्गातारः द्वयोर्द्वयोर्द्वंद्वेकृतेपुनर्द्वंद्वेन हो
तापोतानेष्टोद्गातारः राजदंतादिषुपरं पवपूर्वप्रयोगार्हंपरंस्यात् दंतानांराजाराजदंतः धर्मादिष्वनिय
मः अर्थधर्मौ धर्मार्थौ जंपती दंपती जायापती जायापत्योरस्य जंभावो दंभावश्चवानिपात्यते आकृतिगणो
यं द्वंद्वेघि द्वंद्वेघिसंज्ञंपूर्वंस्यात् हरिश्चहरश्चहरिहरौ अनेकप्राप्तावेकत्रनियमोऽनियमः शेषे हरि

स॰ द्वं॰ सिद्धां॰ ३६

76

गुरुहराः हरिहरगुरवः अजाद्यदंतं द्वंद्वे पूर्वं स्यात् ईशकृष्णौ बहुष्वनियमः अश्वरथेन्द्राः इन्द्राश्वरथाः
अनादजाद्यदंतविप्रतिषेधेन इंद्राग्नी अल्पाच्तरं शिवकेशवौ ऋतुनक्षत्राणां समानाक्षराणामानुपूर्व्या हेमंत
शिशिरवसंताः कृत्तिकारोहिण्यौ समानाक्षराणां किं ग्रीष्मवसंतौ लघ्वक्षरं पूर्वं कुशकाशं अभ्यर्हितं
च तापसपर्वतौ वासुदेवार्जुनौ वर्णानामानुपूर्व्येण ब्राह्मणक्षत्रियविट्शूद्राः भ्रातुर्ज्यायसः युधि
ष्ठिरार्जुनौ द्वंद्वश्च प्राणितूर्यसेनांगानां एषां द्वंद्व एकवत् स्यात् पाणिपादं मार्दंगिकपाणविकं रथि
काश्वारोहं समाहारस्यैकत्वादेकत्वसिद्धे नियमार्थं प्रकरणं पाणिपादादीनां समाहार एव यथा स्यात्
अनुवादे चरणानां चरणानां द्वंद्वः एकवत् सिद्धस्योपन्यासे स्थेणोर्लुङीति वक्तव्यं उदगात्कठकालापं प्र
त्यष्ठात्कठकौथुमं अध्वर्युक्रतुरनपुंसकं यजुर्वेदे विहितो यः क्रतुस्तद्वाचिनामनपुंसकलिंगानां द्वंद्व एक
वत्स्यात् अर्काश्वमेधं अध्वर्युक्रतुः किं इषुवज्रौ सामवेदे विहितौ अनपुंसकं किं राजसूयवाजपेये अर्द्धे
अध्ययनतोविप्रकृष्टाख्यानां अध्ययनेन प्रत्यासन्ना आख्या येषां तेषां द्वंद्व एकवत् पदकक्रमकं जाति
रप्राणिनां प्राणिवर्ज्यजातिवाचिनां द्वंद्व एकवत् धानाशष्कुलिः प्राणिनां तु विट्शूद्राः द्रव्यजातीना
मेव नेह रूपरसौ गमनाकुंचने जातिप्राधान्य एवायमेकवद्भावः द्रव्यविशेषविवक्षायां तु बदराम
लकानि विशिष्टलिंगो नदीदेशोऽग्रामाः ग्रामवर्ज्यनदीदेशवाचिनां भिन्नलिंगानां समाहारद्वंद्वः स्यात्
उध्यश्च इरावती च उध्येरावति गंगा च शोणश्च गंगाशोणं कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रं भिन्नलिंगा
नां किं गंगायमुने मद्रकेकयाः अग्रामाः किं जाम्बवं नगरं शालूकिनी ग्रामः जाम्बवशालूकिन्यौ क्षुद्रजंतवः एषां
समाहारे द्वंद्वः स्यात् यूकालिक्षं आनकुलात् क्षुद्रजंतवः येषां च विरोधः शाश्वतिकः एषां प्राग्वत् अहिनकु
लं ३६

गोव्याघ्रं काकोलूकमित्यादौ परत्वाद्विभाषा प्राप्नुतस्तु गोतिशब्देन चकारेण वा बाध्यते शूद्राणामनिरवसितानां अब
हिष्कृतानां शूद्राणां प्राग्वत् तक्षायस्कारं पात्राद्बहिष्कृतानां तु चण्डालमृतपाः गवाश्वप्रभृतीनि च यथो
च्चारितानि साधूनि गवाश्वं दासीदासमित्यादि विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्व
वडवपूर्वापराधरोत्तराणां वृक्षादीनामप्राप्ते नाहं द्वन्द्वः अश्ववडवेत्यादि द्वन्द्वे त्रयं च वा प्राग्वत् वृक्षादी
विशेषाणामेव ग्रहणं प्लक्षन्यग्रोधं प्लक्षन्यग्रोधाः रुरुपृषतं रुरुपृषताः कुशकाशं कुशकाशाः।
व्रीहियवं व्रीहियवाः दधिघृतं दधिघृते गोमहिषं गोमहिषाः शुकबकं शुकबकाः अश्ववडवं अश्व
वडवौ पूर्वापरं पूर्वापरे अधरोत्तरं अधरोत्तरे फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां
बहुप्रकृतिरेव द्वन्द्व एकवद्भवतीति वाच्यम् बदराणि चामलकानि च बदरामलकं जातिरप्राणिनामित्येकव।
द्भावः नेह बदरामलके रथिकाश्वारोहौ प्लक्षन्यग्रोधौ इत्यादि विभाषा द्वन्द्वेति तेषु ये प्राणिनस्तेषां ग्रहणं जा
तिरप्राणिनामिति नित्ये प्राप्ते विकल्पार्थम् पशुग्रहणं हस्त्यश्वादिषु सेनाङ्गत्वान्नित्यप्राप्ते मृगाणां मृगैरेव
शकुनीनां शकुनिभिर्वा उभयद्वन्द्वः अन्यैस्तु सह इतरेतरयोग एवेति नियमार्थं मृगशकुनिग्रहणं एवं पूर्वापराधरोत्तरमि
त्यपि अश्ववडवग्रहणं तु पक्षे नपुंसकतार्थं अन्यथा परत्वात् द्वन्द्ववडवाविति स्यात् विप्रतिषिद्धं चानधि
करणवाचि विरुद्धार्थानामद्रव्यवाचिनां द्वन्द्व एकवद्भवति वैकल्पिकः समाहारे द्वन्द्वस्यार्थ इति सूत्रेणाप्राप्तः
अविरुद्धार्थानां यद्यपि भवति तर्हि अद्रव्यवाचिनामेवेति नियमार्थमिदं तेन द्रव्यवाचिनामितरेतरयोग एव
शीतोष्णे उदके स्तः विप्रतिषिद्धं किं नन्दकपाञ्चजन्यौ इह पाक्षिकः समाहारद्वन्द्वो भवत्येव न दधिपयआदीनि
एतानि नैकवत्स्युः दधिपयसी इध्माबर्हिषी ॥

सांख्यायनमेएकवेदेवेतिनियमो नस्मात् दशार्दं तोष्टं दशार्दं तोष्टाः विभाषा समीपे अधिकारोऽतावत् तत्समीपेन परिक्रेयेण

निपातनात् दीर्घः ऊ क्लामे वा स्त्रनेसे अधिकारोऽतावत्वेच सं२ इत्थंसमाहारएकवेदेवेति इत्यो नियमो वा स्यात्
उपदशा दे ताः उपदशाः दंतोष्टाः आनङ् तो द्वंद्वे विद्यायोनिसंबंधवाचिनाम् द्वंद्वे तानो द्वंद्वे आनङ् स्यात् उत्तर
परे पदे होतापोतारौ होतृपोतृनेष्टोद्गातारः मातापितरौ पुत्रे अन्यतरस्यामित्यतो मंडूकप्लुत्या पुत्रः अनुवर्त्यते
पिता पुत्रौ देवताद्वंद्वे च इहोत्तरपदे परे आनङ् मित्रावरुणौ वायुशब्दयोगे प्रतिषेधः अग्निवायू वायवग्नी पु
सं॰ त्र तत्रापि लोके प्रसिद्धव्यवहार साहचर्ये इह मध्ये ब्रह्मप्रजापती त्वाष्टानानङ् एतद्वि नेकोद्दविभागवत्वेन
सि॰ कौ॰ अग्नेः परेषामेषामस्तुषः स्तोमसोमेषु अग्निष्टुत् अग्निष्टोमः अग्नीषोमौ अग्नीवरुणौ इद्वृद्धौ वृद्धिमत्युत्तरपदे अग्नेरिह
७ देशः स्याद्देवताद्वंद्वे अग्नामारुतौ देवता अस्य आग्निमारुतं कर्म अग्नीवरुणौ देवताः स्य आग्निवारुणं देवताद्वंद्वे
त्युभयपदवृद्धिः अलौकिके वाक्ये आनङ् सोऽत्र च बाधित इति वृद्धाविति आग्नेन्द्रः नेन्द्रस्य परस्येत्युत्तरपदवृद्धिप्र
तिषेधः विश्नोऽन आग्नावैष्णवं दिवो द्यावा देवताद्वंद्वे उत्तरपदे द्यावाभूमी द्यावाक्षामे दिवसश्च पृथिव्यां दिवः
सेवयात् द्यावादेशाकारोच्चारणार्थः सकारस्य रुत्वं मा भूदित्येतद्दर्थं द्यौश्च पृथिवी च दिवस्पृथिव्यौ द्यावापृथिव्यौ
सां॰ द्वेदसिद्दष्टानुविधिः द्यावा चिदस्मै पृथिवी दिवस्पृथिव्योररतिं स्यत्रपदकारः विभक्तिपाठं उषासोषसः उ
षसशब्दस्याषादेशो देवताद्वंद्वे उषासासूर्यं मातरपितरावुदीचां उदीचां कि मातापितरौ द्वंद्वाच्चुदषहान्तात्समाहारे
रे चवर्गान्ताद्दषहान्तात्समाहारे वाक्त्वचं त्वक्स्रजं शमीदृषदं वाक्त्विषं छत्रोपानहं समाहारे किं
प्रावृट्शरदौ ॥ ॐ ॥ श्री ॥ ः ॥ इति द्वंद्वः समाप्तः ॥ ॐ ॥ श्री ॥ ः ॥ ॐ नमो करालवदनाय ॥ ः

ष्वेकशेषः स्यात् । रामौ रामाः । विरूपाणामपि समानार्थानां वक्रदंडश्च कुटिलदंडश्च वक्रदंडौ कुटिलदंडौ वृद्धो
यूना तल्लक्षणश्चेदेव विशेषः यूना सहोक्तौ गोत्रं शिष्यते गोत्रयुवप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात् गा
र्ग्यश्च गार्ग्यायणश्च गार्ग्यौ वृद्धः किं गर्गगार्ग्यायणौ यूना किं गर्गगार्ग्यौ तल्लक्षणः किं भागवित्तिभाग
वित्तिकौ एवकारः किं गार्ग्यवात्स्यायनौ स्त्री पुंवच्च यूना सहोक्तौ वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत् गार्गी च गा
र्ग्यायणश्च गार्ग्यौ अस्त्रियामित्यनुवर्तमाने यञञोश्चेति लुक् दाक्षी च दाक्षायणश्च दाक्षी पुमान् स्त्रिया ॥ स्त्रिया स
होक्तौ पुमान् शिष्यते तल्लक्षण एव विशेषश्चेत् हंसी च हंसश्च हंसौ भ्रातृपुत्रौ स्वसृदुहितृभ्याम् भ्राता च स्वसा च भ्रात
रौ पुत्रश्च दुहिता च पुत्रौ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् अक्लीबेन सहोक्तौ क्लीबं शिष्यते तच्च वा एकव
त्स्यात् तल्लक्षण एव विशेषश्चेत् शुक्लः पटः शुक्ला पटी शुक्लं वस्त्रं तदिदं शुक्लं तानीमानि शुक्लानि पिता
मात्रा मात्रा सहोक्तौ पिता वा शिष्यते माता च पिता च पितरौ मातापितरौ श्वशुरः श्वश्र्वा श्वश्र्वा सहोक्तौ श्वशुरो
वा शिष्यते श्वशुरौ श्वश्रूश्वशुरौ त्यदादीनि सर्वैर्नित्यं सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते स च देवदत्तश्च
तौ त्यदादीनां मिथः सहोक्तौ यत्परं तच्छिष्यते स च यश्च यौ पूर्वशेषोऽपि दृश्यत इति भाष्यम् स च यश्च तौ त्यदादि
तः शेषे पुंनपुंसकतो लिङ्गवचनानि सा च देवदत्तश्च तौ तच्च देवदत्तश्च यज्ञदत्ता च तानि पुंनपुंसकयोस्तु परत्वा
न्नपुंसकं शिष्यते तच्च देवदत्तश्च ते अद्वन्द्वतत्पुरुषविशेषणानामिति वक्तव्यम् कुक्कुटमयूर्याविमे मयूरीकुक्कुटा
विमौ तच्च सा चार्धपिप्पल्यौ ते ग्राम्यपशुसंघेष्वतरुणेषु स्त्री पशुसहविवक्षायां स्त्री शिष्यते पुमान् स्त्रियेत्यस्या
पवादः गाव इमाः ग्राम्येति किं रुरव इमे पशु किं ब्राह्मणाः संघेषु किं एतौ गावौ अतरुणेषु किं वत्सा इमे अनेकश
फेष्विति वाच्यम्

मयूराऽमे इहसर्वत्र एकशेषेकृते ऽनेकाभावात् द्वंद्वेन तेन शिरसी शिरांसीत्यादौ समासस्येत्यपेतोदात्तः प्रागेवग
तादिकावज्ञाविस्खलन पंथानौ पंथानः इत्यादौ समासातेतान॥ : ॥२॥ इत्येकशेषः॥ ॥३॥ श्रीः ॥
इत्तहि न समासैकशेषसनाद्यंतधातुरूपाः पंच वृत्तयः परार्थाभिधानं वृत्तिः वृत्त्यर्थावबोधकं वाक्यं विग्रहः स
द्विधा लौकिकोऽलौकिकश्च परिनिष्ठितत्वात्साधुर्लौकिकः प्रयोगाः साधुरलौकिकः यथा राज्ञः पुरुषः राजन्
अस् पुरुष सु इति अविग्रहो नित्यसमासोऽस्वपदविग्रहो वा समासस्तु इति प्रायोवादः अव्ययीभावतत्पुरुष
स॰स॰ बहुव्रीहिद्वंद्वाधिकारबहिर्भूतानामपि सह सुपेति विधानात् पूर्वपदार्थप्रधानोऽव्ययीभावः उत्तरपदार्थप्रधा
सि॰कौ॰ नस्तत्पुरुषः अन्यपदार्थप्रधानो बहुव्रीहिः उभयपदार्थप्रधानो द्वंद्व इत्यपि प्रायोवादः प्रायोभिप्रायः सूपप्र
५ ति उन्मत्तगंगमित्याद्यव्ययीभावे अतिमालादौ तत्पुरुषे द्वित्राः सप्त त्र इत्यादि बहुव्रीहौ दंतोष्ठमित्यादि द्वंद्वे चाभा
78 वात् तत्पुरुषविशेषः कर्मधारयः तद्विशेषो द्विगुः अनेकसंपदं द्वंद्वबहुव्रीह्योरेव तत्पुरुषस्यापि क्वचिदेवेत्युक्तं कि
तिङ्गंः च सुपासुपा तिङा नाम्ना धातुनाथ तिङां तिङा सुबंतेनेति च वक्तव्यः समासः षड्विधो बुधैः सुपां राजपुरुषः तिङा पर्यभू
षत् नाम्ना कुंभकारः धातुना कटप्रूः अजस्तं तिङां पिबत खादत तिङा सुपा कृंतविचक्षणेति यस्यां क्रिया
यामभिहितं कृंतविचक्षणा एहीडादयोऽन्यपदार्थे इति मयूरव्यंसकादेपाठात्समासः ॥ : श्रीः ॥
श्रीः ॥ इति सर्वसमासशेषः ॥ श्रीः
कुंभकारं वधः प्रधानामानेचे अस्मन्ते इति च्छेदः अगादंतस्य समासस्य अंत्यस्यात्त्र वयवः स्यात् अंते घाधस
दंतस्याने अर्द्धर्चः अन्यच बहुत्र वधेनतयेच नेह अन्यकसामत्क्षक सांशो विप्रोः सः विप्रगुरं क्लीवत्वेतो
कात्

विमलं सरः । द्व्यन्तरुपसर्गेभ्योऽप ईत् । अप इति कृतसमासान्तस्यानुकरणं षष्ठ्यर्थे प्रथमा एभ्योऽपस्य ईः स्या
त् द्विगता आपोऽस्मिन्निति द्वीपं अन्तरीपं प्रतीपं समीपं समापो देवयजनं इति तु समा आपोऽस्मिन्निति
बोध्यं कृतसमासान्तग्रहणान्नेह स्वप् स्वपी अवर्णान्ताद्वा प्रेपं परेपं प्रापं परापं ऊदनोर्देशे अनोः प
रस्य अपस्य ऊत्स्याद्देशे अनूपो देशः राजधुरा अक्षे तु अक्षधूः दृढधूः रूढः सखिपथो रम्यपथो देशः अन्वव
तप्तात्सामलोम्नः एतत्पूर्वात्सामलोमान्तात्समासादच् स्यात् प्रतिसामं अनुसामं अवसामं प्र
तिलोमं अनुलोमं अवलोमं कृष्णोदक्पाण्डुसंख्यापूर्वाया भूमेरजिष्यते कृष्णभूमः उदग्भूमः
पाण्डुभूमः द्विभूमः त्रिभूमः प्रासादः संख्याया नदीगोदावरीभ्यां च पञ्चनदं सप्तगोदावरं अजिति
योगविभागादन्यत्रापि पद्मनाभः अक्ष्णोऽदर्शनात् अगवाक्षः पर्यायपाद लोण्च समासान्तः ग
वाक्षः गवाक्षः अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठी
वपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्ष २२ ष°
वृद्धोक्षोपशुनगोष्ठश्वाः एते पञ्चविंशतिरजन्ता निपात्यन्ते आद्यास्त्रयो बहुव्रीहयः अविद्यमानानि च
त्वार्यस्य अचतुरः विचतुरः सुचतुरः उपाभ्यां चतुरोऽजिष्यते त्रिचतुराः चतुर्भ्यो समीपे उपचतुराः त
तएकादशद्वन्द्वाः स्त्रीपुंसौ धेन्वनडुहौ ऋक्सामे वाङ्मनसे अक्षिभ्रुवं दारगवं
दारगवं ऊरू च अष्ठीवन्तौ च ऊर्वष्ठीवं निपातनाट्टिलोपः पदष्ठीवं निपातनात्पादशब्दस्य पद्भावः नक्तं च दिवा
च नक्तंदिवं रात्रौ च दिवा च रात्रिंदिवं रात्रेर्मान्तत्वं निपात्यते अहनि च दिवा च अहर्दिवं वीप्सायां द्वन्द्वो नि
पात्यते

प्रासाकारानामिर्येस्व=
व°
अक्षुभ्रमप्योर्तिर्यपष्टः गो°
विगताश्चत्वारि यस्य स तथा=
प°

७९

सरजसं पंकेरुहं मयपरिमंडले सर्वः =२

अहन्यहनीत्यर्थः सरजसमिति तिसाकल्येऽव्ययीभावः बहुव्रीहौ तु सरजः पंकजं निश्चितं श्रेयो निःश्रेयसं तत्
रुष एव नेह निःश्रेयान् पुरुषः पुरुषस्यायुः पुरुषायुः षततो द्वौ द्विरायुषां चायुषं आयुषं ततो द्वंद्वः ऋग्यजुषं त
तस्य च कर्मधारयाः जातोक्षः महोक्षः वृद्धोक्षः श्वनः समीपमुपशुनं टिलोपाभावः सम्प्रसारणं चेति पात्य
ते गोष्ठे श्वा गोष्ठश्वः ब्रह्महस्तिभ्यां वर्चसः अच् स्यात् ब्रह्मवर्चसं हस्तिवर्चसं पल्यराजभ्यां चेति वक्तव्य
पल्यवर्चसं राजवर्चसं अवसमन्धेभ्यस्तमसः अवतमसं संतमसं अन्धयतीत्यन्धं पचाद्यच् अन्धंतमो ऽन्धतमसं — अंधंतमः अंधतमसं=
श्वोवसीयः श्रेयसः वस्यसः प्रशस्तवाची ततः ईयसुनि वसीयः श्वस् शब्द उत्तरपदार्थप्रशंसामाशीर्विषय
माह मयूरव्यंसकादित्वात्समासः श्वोवसीयं श्वः श्रेयसं ते भूयात् अन्ववतप्ताद्रहसः अनुरहसं अवरहसं त
प्तरहसं प्रतेरुरसः सप्तमीस्थात् उरसि प्रति प्रत्युरसं विभक्त्यर्थेऽव्ययीभावः अनुगवमायामे एतन्निपात्यते
दीर्घत्वे अनुगवं यानं यस्य चायामः इति समासः ॥ द्विस्तावा त्रिस्तावा वेदिः अच्प्रत्ययष्टिलोपः समासश्च निपा
त्यते यावती प्रकृतौ वेदिस्ततो द्विगुणा त्रिगुणा वा अश्वमेधादौ तत्रेदं निपातनं वेदिरिति किं द्विस्तावती त्रिस्ता
वती रज्जुः उपसर्गादध्वनः प्रगतोऽध्वानं प्राध्वो रथः न पूजनात् पूजनार्थेभ्यः समासान्ता न स्युः सुरा
जा अतिराजा स्वतिभ्यामेव नेह परमराजः पूजनात् किं गामतिक्रान्तो ऽतिगवः बहुव्रीहौ सक्थ्यक्ष्णोरित्य
तः प्राप्तषच्प्रत्ययनिषेधः नेह सुसक्थः स्वक्षः किमः क्षेपे तत्पुरुषः किंशब्दात्क्षेपे तत्पुरुषे समासान्ता न स्युः
कुत्सितो राजा किंराजा किंसखा किंगौः क्षेपे किं किंराजः किंसखः किंगवः नञस्तत्पुरुषात् समासान्तो न
अराजा असखा नञ्स्तत्पुरुषात्किं अधुरं शकटं पथो विभाषा नञः परो यः पथो वा समासान्तः अपथं अपथः नञ बहुव्रीहौ तु नञ्परो अपथो देशः अपथं — अपथं पन्थाः सर्वपथं द्विपथं गोपथं बहुवीहौ तु अपथः
वर्त्म

॥ इति समासान्ताः ॥

स॰ से॰
सि॰ कौ॰
७१

पत्रं=८
त्रिविधाः यत्ताः भवन्ति प्रकृतिय
त्ताः विकृतिपराश्च मुख्याः प्र
कृतिपराः तदपराः विकृति
पत्ताः

अधुरं नञ्स्तत्पुरुषाया=२ अनुसमकिन्नीपस्य सतया=३
बहुव्रीहौ अपथो नाति सुपथ आदिरीयस्य सतथा=३
किंराजा बहुव्रीहिरेव=१

नपंथाः सतथा=१
नपंथा विकर्षिमिन्ये पोतान
था=१

अन्तिकान्मुक्तः दूरान्मुक्तः कृच्छ्रान्मुक्तः =२ षष्ठाध्यायस्य तृतीयपादस्य समाप्तेः =१

ॐ अलुगुत्तरपदे अलुगधिकारः प्रागानङः उत्तरपदाधिकारस्त्वापादसमाप्तेः पंचम्याः स्तोकादिभ्यः एभ्यः पंचम्या
अलुक् स्यादुत्तरपदे स्तोकान्मुक्तः एवमन्तिकार्थदूरार्थकृच्छ्रेभ्यः उत्तरपदे किं निष्क्रान्तः स्तोकात् निस्तोकः ब्रा
ह्मणाच्छंसिन उपसंख्यानं ब्राह्मणा विहितानि शास्त्राण्युपचाराद्ब्राह्मणानि तानि शंसतीति ब्राह्मणाच्छंसी ऋ स
त्विग्विशेषः द्वितीयायाश्चेत्युपसंख्यानादेवः ओजःसहोम्भस्तमसस्तृतीयायाः ओजसाकृत
मित्यादि अंजस उपसंख्यानं अंजसाकृतं आर्जवेन कृतमित्यर्थः पुंसानुजो जनुषान्ध इति च य
स्याग्रजः पुमान् स पुंसानुजः जनुषान्धो जात्यन्धः मनसः संज्ञायां मनसागुप्ता संज्ञायामि
द्यण् कौहडः पिता तत इञ् कौहडिः पुत्रः यूनि किं वामरथ्यस्य छात्राः वामरथाः इति ञ्योऽलुक्तु न
भवति आर्षग्रहणेन प्रतिपदोक्तस्यैवर्ष्यणश्च ग्रहणात् पाणिनिना प्रोक्तं पाणिनीयं वृद्धाच्छः इन
स्यापत्येन गोत्रेयञ् तदन्तादिति वक्ष्यमाणत्वात् ततोऽध्येतृवेदित्रोर्लुक् स्वरे स्त्रियां च विशेषः
पाणिनीयः पाणिनीया सूत्राच्च कोपधात् सूत्रवाचिनः ककारोपधादध्येतृवेदितृप्रत्यय
स्य लुक् स्यात् अप्रोक्तार्थ आरम्भः अष्टावध्यायाः परिमाणमस्याष्टकं पाणिनेः सूत्रं तदधीयते विदं
ति वा अष्टकाः

त-
सि- कौ-
४७
९१

छन्दोब्राह्मणानि च तद्विषयाणि ॥ छन्दांसि ब्राह्मणानि प्रोक्तप्रत्ययान्तानि तद्विषयाणि स्युः । अध्येतृवेदितृप्रत्ययं वि-
नान प्रयोज्यानीत्यर्थः । कठेन प्रोक्तमधीते कठाः । वैशंपायनान्तेवासीति णिनिः । तस्य कठचरकादिति लुक् । मौ-
दोऽग्ना तस्य प्रोक्तालुक् । तदस्मिन्नस्तीति देशे तन्नाम्नि । उदुम्बराः सन्त्यस्मिन्देशे औदुम्बरः । तेन निर्वृत्तम् । कुशाम्बे-
न निर्वृत्ता कौशाम्बी नगरी । तस्य निवासः । शिबीनां निवासो देशः शैबः । अदूरभवश्च । विदिशाया अदूरभवं
वैदिशं नगरं । चकारेण प्रागुक्तास्त्रयोऽर्थाः सन्निधाप्यन्ते तेन वक्ष्यमाणप्रत्ययानां चातुरर्थिकत्वं सिध्यति
ओरञ् । अणोऽपवादः । कक्षतु काक्षतवं । नद्यां मतुप् । तन्त इक्षुमती । मतोश्च बह्वजङ्गात् । बह्वचः अंगोय- सौ
स्य मतुपः तदन्तात् ञः नाम्न सैध्रकावतं बह्वजिति किं आहिमतं अंगग्रहणं बह्वजिति तद्विशेषणं यथा
स्यात् मतुपो विशेषणं माभूत् । बह्वचः कूपेषु । अणोऽपवादः । दीर्घवरत्रेण निर्वृत्तः दैर्घवरत्रः कूपः । उ-
दक्च विपाशः । विपाशः उत्तरकूले ये कूपास्तेषु अञ् । अबह्वजर्थ आरम्भः । दत्तेन निर्वृत्तः कूपो दात्तः । उदक्कौ-
दक्षिणतः कूपेष्वण् एव । संकलादिभ्यश्च । कूपेष्विति निवृत्तम् । संकलेन निर्वृत्तः सांकलः । पौष्कलः । स्त्रीषु सौवी-
रसाल्वप्राक्षु । स्त्रीलिंगेषु देशेषु एषु वाच्येष्वञ् । सौवीरे दत्तामित्रेण निर्वृत्ता दात्तामित्री नगरी । साल्वे वै-
धूमाग्नी । प्राचि माकन्दी । सुवास्त्वादिभ्योऽण् । अञोऽपवादः । सुवास्तोरदूरभवं सौवास्तवं । वर्णौ वर्णावंश-
ग्रहणं नद्यां मतुपो बाधनार्थं सौवास्तवी । रोणी । रोणीशब्दान्तत्वाच्चाण् कूपादञोऽपवादः । रौणः । आ-
जकरोणः । कोपधाच्च अण् । अञोऽपवादः । कार्णच्छिद्रकः । कार्णच्छिद्रकः कूपः । कार्कवाकवं त्रैशंकवं । बुञ्-
छाण्कठजिलसेनिरढञ्ण्ययफफिञिञ्ञ्यककठकोऽरीहणकृशाश्वर्ष्यकुमुदकाशतृणप्रेक्षाश्मस ४७

तदस्मिन्नस्तीति तेननिर्वृत्तं २ तस्यनिवासः ३ अदूरभवः ४ =

ष्ठिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः सप्तदशभ्यः सप्तदश क्रमात्स्युश्चातुरर्थ्यां अरीहणा
दिभ्यो वुञ् अरीहणेन निर्वृत्तमारीहणकं कृशाश्वादिभ्यश्छण् कार्शाश्वीयं ऋश्यादिभ्यः कः ऋश्यकं कु
मुदादिभ्यष्ठच् कुमुदिकं काशादिभ्य इलः काशिलः तृणादिभ्यः सः तृणसं प्रेक्षादिभ्य इनिः प्रेक्षी अ
श्मादिभ्यो रः अश्मरः सख्यादिभ्यो ढञ् साखेयं संकाशादिभ्यो ण्यः सांकाश्यं बलादिभ्यो यः बल्यं प
क्षादिभ्यः फक् पाक्षायणः पथः पन्थ च पान्थायनः कर्णादिभ्यः फिञ् कार्णायनिः सुतंगमादिभ्य
इञ् सौतंगमिः प्रगदिनादिभ्यो ञ्यः प्रागदिनः प्रागद्यः वराहादिभ्यः कक् वाराहकः कुमुदादिभ्य
ष्ठक् कौमुदिकः जनपदे लुप् जनपदे वाच्ये चातुरर्थिकस्य लुप् स्यात् लुपि युक्तवद्व्यक्तिवचने लुपि स
ति प्रकृतिवल्लिंगवचने स्तः पञ्चालानां निवासो जनपदः पञ्चालाः कुरवः अंगाः वंगाः कलिंगाः त
दशिष्यं संज्ञाप्रमाणत्वात् युक्तवद्वचनं न कर्तव्यं संज्ञानां प्रमाणत्वात् लुब्योगाप्रख्यानात् लुबपि
न कर्तव्यो ऽवयवार्थस्येहाप्रतीतेः योगप्रमाणे च तदभावे दर्शनं स्यात् यदि हि योगस्यावयवार्थस्येदं बो
धकं स्यात् तदा तदभावे न दृश्येत प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् प्रत्ययार्थः प्रधानमित्ये प्रकृतिप्रत्यययोः प्रत्ययार्थः प्रधानं =
वंरूपवचनमप्यशिष्यं कुतः अर्थस्य लोकत एव प्रसिद्धेः कालोपसर्जने च तुल्यं अतीताया रात्रेः
पश्चार्द्धेनागामिन्याः पूर्वार्द्धेन च सहितो दिवसो ऽद्यतनः विशेषणानामुपसर्जनमित्यादि पूर्वाचार्यैः
परिभाषितं तत्राप्यशिष्यत्वं समानं लोकप्रसिद्धेः विशेषणानां चाजातेः लुबर्थस्य विशेषणानाम
पि तद्वल्लिंगवचने स्तो जातिं वर्जयित्वा पञ्चाला रमणीयाः गोदौ रमणीयौ अजातेः किं पञ्चाला जन

पंचालग्रामस्थःपुमान्

त.

सि.कौ. ९८

९४

पदः गोदौ ग्रामः हरितकादिषु व्यक्तिः हरितक्याः फलानि हरीतकयः खलतिकादिषु वचनं खलतिक
स्य पर्वतस्य अदूरभवानि वनानि खलतिकं मनुष्यलुपि प्रतिषेधः मनुष्यलुपि विशेषणानां न
लुब्वत्स्यान्न भवतीत्यर्थः चञ्चा अभिरूपः वरणादिभ्यश्च जनपदार्थे आरंभः वरणानामदूरभवं नगरं वर
णाः शर्कराया वा अस्माच्चातुरर्थिकस्य वा लुप् स्यात् ठक्छौ च शर्करायाः एतौ स्तः कुमुदादौ वराहा
दौ च पाठसामर्थ्यात् पक्षे ठञ्छकौ वा ग्रहणसामर्थ्यात् पक्षे औत्सर्गिकोऽण् तस्य लुब्विकल्पः षड्
रूपाणि शर्करा शार्करं शार्करिकं शार्करीयं शार्करिकं शार्करकं नद्यां मतुप् चातुरर्थिकः इक्षुमती
मध्वादिभ्यश्च मतुप् स्यात् चातुरर्थिकः मधुमान् कुमुदनड्वेतसेभ्यो ड्मतुप् कु
मुद्वान् नड्वान् वेतस्वान् आद्ययोरर्थः इति अतेमादुपधाया इति वत्वम् महिषाच्चेति वक्त
व्यं महिष्मान्नाम देशः नडशादाड्ड्वलच् नड्वलः शादो जंबालघासयोः शाड्वलः शिखाया वलच्
शिखावलं उत्करादिभ्यश्छः उत्करीयं नडादीनां कुक् च नडकीयं क्रौञ्चाया ह्रस्वश्च क्रुञ्च
कीयं तक्षन्नलोपश्च तक्षकीयं बिल्वकादिभ्यश्छस्य लुक् नडादि अन्तर्गता बिल्वकादयस्तेभ्यश्छ
स्य लुक् तद्धिते परे बिल्वा यस्यां सन्ति सा बिल्वकीया तस्यां भवाः बैल्वकाः वेत्रकीया वैत्रकाः
छस्य किं कुमात्रस्य लुग्यथा स्यात् कुको निवृत्तिर्मा भूत् अन्यथा सन्नियोगशिष्टानामिति कु
गपि निवर्तेत लुग्ग्रहणं सर्वलोपार्थं लोपो हि यमात्रस्य स्यात् श्री इति चातुरर्थिकाः श्री
शेषे अपत्यादि चातुरर्थ्यं तादन्योऽर्थः शेषस्तत्राणादयः स्युः चाक्षुषं रूपं श्रावणश्

९८

द्वः औपनिषदः पुरुषः दृषदि पिष्टा दार्षदाः सक्तवः उलूखले क्षुण्ण औलूखलो यावकः अग्रे भक्ष्यते आग्नेयोऽथः च
तुर्भिः हूयते चातुरंशकटं चतुर्दश्यां दृश्यते चातुर्दशं रक्षः शेषे तिलक्षणं चाधिकार स्यात् तस्य विकार इत्यतः प्राक्
शेषाधिकारः राष्ट्रावारपाराद्घखौ आभ्यां क्रमाद् घखौ स्तः शेषे राष्ट्रियः अवारपारीणः अवारपाराद्विगृही
तादपि विपरीताच्चेति वक्तव्यं अवारीणः पारीणः पारावारीणः इह प्रकृतिविशेषाद्घादयष्ठ्युट्युलन्ताः प्रत्य
या उच्यन्ते तेषां जातादयोऽर्थविशेषाः समर्थविभक्तयश्च वक्ष्यन्ते ग्रामाद्यखञौ ग्राम्यः ग्रामीणः कत्त्या
दिभ्यो ढकञ् कुत्सितानां स्त्रियः कत्त्रयः तत्र जातादि कात्त्रेयकः नागरेयकः ग्रामादित्यनुवृत्ते ग्रामेयकः कु
लकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु कौलेयकः श्वा कौलोऽन्यः कौक्षेयकोऽसिः कौक्षोऽन्यः ग्रैवेयको
ऽलंकारः ग्रैवोऽन्यः नद्यादिभ्यो ढक् नादेयं माहेयं वाराणसेयं दक्षिणापश्चात्पुरसस्त्यक् दाक्षिणात्यः आज
तमव्ययं दाक्षिणात्यः पाश्चात्यः पौरस्त्यः कापिश्याः ष्फक् कापिश्यां जातादिः कापिशायनं मधु कापिशा
यनी द्राक्षा रङ्कोरमनुष्येऽण् च रांकवो गौः रांकवायणः अमनुष्ये किं रांकवो मनुष्यः द्युप्राग ५८
पागुदक्प्रतीचो यत् दिव्यं प्राच्यं अपाच्यं उदीच्यं प्रतीच्यं कन्थायाष्ठक् कान्थिकः वर्णौ वुक् वर्णुर्नद
समीपदेशो वार्णवः तद्विषयार्थ वाचिकन्थाशब्दाद्वुक् तथा हि जातं हिमवत्सु कान्थकं अव्ययात्त्यप् अमेहा
क्वतसित्रेभ्य एव अमान्तिकसहार्थयोः अमात्यः इहत्यः क्वत्यः ततस्त्यः तत्रत्यः परिगणनं किं उपरिष्टा
द्भवः औपरिष्टः अव्ययानां भमात्रे टिलोपः अनित्योऽयं बहिषष्टिलोपो विधानात् तेनेह न आरातीयः त्
ष्णेर्ध्रुवे त्यब्वक्तव्यो नित्यः निसो गते ह्रस्वात्तादौ तद्धिते ह्रस्वादिणः परस्य सस्य षः स्यात्तादौ तद्धिते निर्गतो

न·

सि·कौ·
९९

99

वर्णाश्रमेभ्यो निष्टाः चांडालादि इस्वाल्किं गोमतीं तादौ किं सर्पिः स्यात् तद्धितेकिं सर्पिष्कतरति अरण्यायाम्ः आर
ण्याः सुमनसः हराद्वेत्पः हरेत्पः उत्तरादाहञ् औत्तराहः एषमोद्यः स्वमोन्तरस्यां एभ्यस्त्यपि वा पत्येवत्स
माणो द्युप्रुलोम्पष्मस्तरं एषमस्तनं स्यत्स श्वस्तनं स्वस्त्य स्थलन पदेशो वस्तिकं वस्यते तीरह्रस्पो त्तरपदादञ्जो
यथासंख्येन काकतीरं पाल्वलतीरं शैवह्रस्प तीरह्रस्पान्तादिति नोक्त वङ्कचहृस्वान्माभूत वाह्रस्पं दिक्पूर्वा
दसंज्ञायां ञः अणोपवादः पौर्वशालः असंज्ञायांकिं संज्ञाभूतायाः प्रकृतेर्माभूत् पूर्वेषुकामशम्याभवः
पूर्वकामशमः प्राचां ग्रामनगराणाम् इत्युत्तरपदादिवृद्धिः मद्रेभ्योञ् दिक्पूर्वपदादित्येव दिशोमद्राणामि
ति मद्रपर्युदासादादिवृद्धिः पौर्वमद्रः आपरमद्रः उदीच्यग्रामाच्च बह्वचोन्तोदात्तात् अस्मात् शैवपुरं प्रस्थो
त्तरपदपलद्यादिकोपधादण् माहकिप्रस्थः पालदः नैलीनकः कण्वादिभ्यो गोत्रे एभ्यो गोत्रप्रत्ययान्तेभ्यो
ऽण् स्यात् कण्वो गर्गादिः काण्वस्य छात्राः काण्वाः इञश्च गोत्रेयः इञ् तदन्तादण् स्यात् दाक्षाः गोत्रे किं
सौतंगमेरिदं सौतंगमीयं गोत्रमिहशास्त्रीयं न तु लौकिकं तेनेह न पाणिनीयं नह्याचः प्राच्यभरतेषु इञश्चे
त्यणोपवादः प्रौष्ठीयाः काशीयाः भरतानां प्राच्यत्वेपि पृथग्ग्रहणादनेनान्यत्र प्राच्यग्रहणे भरतानामग्रहणस्य
लिङ्गं वृद्धिर्यस्याचामादिस्तद्वृद्धं यस्य समुदायस्याचां मध्ये आदिवृद्धिस्तद्वृद्धसंज्ञं स्यात् त्यदादीनि च वृद्धसंज्ञा
नि स्युः वृद्धाच्छः शालीयः मालीयः तदीयः एङ् प्राचां देशे एङ् यस्याचामादिस्तद्वृद्धसंज्ञं वा स्यात् देशा
भिधाने एणीपचनीयः ऐणीपचनः गोनर्दीयः भोजकटीयः एङ् किं आहिच्छत्रः कान्यकुब्जः वाना
मधेयस्य वृद्धसंज्ञा वक्तव्या देवदत्तीयः दैवदत्तः भवतष्ठक्छसौ वृद्धाद्भवतष्ठक् छसौ स्तः भावत्कः जस्सम ॥

गोनर्दः१ भोजकटः१

वदीयः वृद्धादित्यनुवृत्तेः शब्दंतादृशोव भावतः कापिश्यादिभ्यष्ठञ्त्रियो रकारउच्चारणार्थः कापिशिका वैदिकी वैदि
का आपदादिपूर्वपदात्कालान्तात् आपदादिराकृतिगणः आपत्कालिकी आपत्कालिका वाहीकग्रामेभ्य
श्च वाहीकग्रामवाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ स्तः छस्यापवादः कास्तीरं नाम वाहीकग्रामः कास्तीरिकी कास्तीरि
का विभाषोशीनरेषु एषु ये ग्रामास्तद्वाचिभ्यो वृद्धेभ्यष्ठञ्ञिठौ वा स्तः सौदर्शिनिकी सौदर्शिनिका सौदर्श
नीयः ओर्देशे ठञ् उवर्णान्ताद्देशवाचिनष्ठञ् स्यात् निषादकर्षूः नैषादकर्षुकः केणाद्भिति ह्रस्वः देशेकिं
पटोश्छात्राः पाटवः ञिठ आवर्तयितव्यः ठञ्ग्रहणं वृद्धाच्छं परत्वादयं बाधते दाक्षिकर्षुकः वृद्धात्प्राचां
प्राग्देशवाचिनो वृद्धाद्दवेति नियमार्थं सूत्रं आढकजम्बुकः शाकजम्बुकः नेह मल्लवास्तु मल्लवास्तवः
धन्वयोपधाद्वुञ् धन्वविशेषवाचिनो यकारोपधाच्च देशवाचिनो वृद्धाद्वुञ् स्यात् ऐरावतं धन्व ऐरावतकः
साकाश्यकाम्पिल्यप्राप्तौ वुञ्छणादिसूत्रे योपधापातौ साकाश्यकः काम्पिल्यकः प्रस्थपुरवहान्ताच्च एतद
न्ताद्वृद्धाद्देशवाचिनो वुञ् स्यात् छस्यापवादः मालाप्रस्थकः नान्दीपुरकः पैलुवहकः पुरान्तग्रहणमप्राग्गार्थं प्रा
ग्देशार्थं तु उत्तरेणैव सिद्धं रोपधेतोः प्राचां रोपधादीकारान्ताच्च प्राग्देशवाचिनो वृद्धाद्वुञ् स्यात् पाटलिपुत्रकः ऐतः
काकंदकः जनपदतदवध्योश्च जनपदवाचिनस्तदवधिवाचिनश्च वृद्धाद्वुञ् स्यात् आदर्शकः त्रैगर्तकः
अवृद्धादपि बहुवचनविषयात् अवृद्धाद्वृद्धाच्च जनपदतदवधिवाचिनो बहुवचनविषयात्प्रातिपदिकाद्वु
स्यात् अवृद्धादणो वृद्धाच्छस्यापवादः अवृद्धाज्जनपदात् आङ्गकः अवृद्धाज्जनपदावधेः आजमीढकः
वृद्धाज्जनपदात् दार्वकः वृद्धाज्जनपदावधेः कालञ्जरकः विषयग्रहणं किं एकशेषेन बहुत्वमाभूत्

त॰

सि॰ कौ॰
१००

100

वर्त्तनी चैवं वर्त्तन्यः तास्तु भवो वार्त्तनः काकामिवक्त्रगर्त्तोत्तरपदात् देशवाचिनो हृद्भादच इत्यादावुत्सात् दाम
कह्लकः काडायकः सैधुवक्तकः वाहवर्तकः धूमादिभ्यश्च देशवाचिभ्यो वुञ् धौमकः तैर्थकः नगरात्कु
त्सनप्रावीण्ययोः नगरशब्दाद्वुञ् स्यात् कुत्सने प्रावीण्ये च गम्ये नागरकः चोरः शिल्पी वा एतयोः किं ना
गराः ब्राह्मणाः अरण्यान्मनुष्ये वुञ् आरण्यस्य अणोऽपवादः पथ्यध्यायन्यायविहारमनुष्यहा
स्तिष्विति वाच्यं आरण्यकः पन्था अध्यायो न्यायो विहारो मनुष्यो हस्ती वा वा गोमयेषु आरण्यकः आ
रण्यो वा गोमयः विभाषा कुरुयुगन्धराभ्यां वुञ् कौरवकः कौरवः यौगंधरकः यौगंधरः मद्रवृज्योः कन्
जनपदवुञोऽपवादः मद्रेषु जातो मद्रकः वृजिकः कोपधादण् माहिषिकः कच्छादिभ्यश्च देशवाचि
भ्योऽण् स्यात् वुञादेरपवादः काच्छः सैन्धवः मनुष्यतत्स्थयोर्वुञ् कच्छादिभ्यः अणोऽपवादः कच्छे जातादिः का
च्छको मनुष्यः काच्छिकं हसितं मनुष्य इति किं काच्छो गौः अपदातौ साल्वात् साल्वशब्दस्य कच्छादित्वाद्वुञि
सिद्धे नियमार्थमिदं साल्वकः अपदातौ किं साल्वः पदातिर्व्रजति गोयवाग्वोश्च साल्वाद्वुञ्
कच्छाद्यणोऽपवादः साल्वको गौः साल्विका यवागूः साल्वसंज्ञात् गर्त्तोत्तरपदाच्छः देशे अणोऽपवादः वृकगर्त्ती
यं उत्तरपदग्रहणं बहुच्पूर्वनिरासार्थं वाहुगर्त्तं गहादिभ्यश्च छः गहीयः मुखपार्श्वतसोर्लोपश्च मुखतीयं पार्श्व
तीयं अव्ययानां भमात्रे टिलोपस्यानित्यताज्ञापयितुमिदं कुग्जनस्य परस्य च जनकीयं परकीयं देवस्य च देवकी
यं स्वस्य च स्वस्येदं स्वकीयं वेणुकादिभ्यश्छण् वाच्यः वैणुकीयं वैत्रकीयं औत्तरपदकीयं प्राचां कटादेः प्राग्दे
शवाचिनः कटादेश्छः स्यात् अणोऽपवादः कटनगरीयं कटघोषीयं कटपल्वलीयं राज्ञः क च वृद्धाच्छे सिद्धे

१००

१४

अकस्थ्यरकस्युनोग्रंतेपस्यतस्मात्

तत्संनियोगेनकादेशमात्रंविधीयते राजकीयं वृद्धादकेकांतखोपधात् अकर्कपवमेतांतखोपधाच्च वृद्धादेशवा
चिनःछः स्यात् ब्राह्मणकोनामजनपदः यत्रब्राह्मणाआयुधजीविनः तत्रजातोब्राह्मणकीयः शाल्मलिकीयः
आयोमुखीयः कंथापलदनगरग्रामह्रदोत्तरपदात् कंथादिपंचकोत्तरपदाद्देशवाचिनोवृद्धाछः स्यात् ठञ्ञिठादेर
पवादः दाक्षिकंथीयं दाक्षिपलदीयं दाक्षिनगरीयं दाक्षिग्रामीयं दाक्षिह्रदीयं पर्वताच्च पर्वतीयोमनुष्यः विभाषा
ऽमनुष्ये मनुष्यभिन्नेऽर्थेपर्वताच्छोवास्यात् पक्षेऽण् पर्वतीयानिपार्वतानिवाफलानि मनुष्येकिं पर्वतीयोमनुष्यः
कृकणपर्णाद्भारद्वाजे भारद्वाजदेशवाचिभ्यामाभ्यांछः कृकणीयं पर्णीयं भेतिकिं कार्कणं पार्णं युष्मदस्मदोर
न्यतरस्यांखञ्च चाच्छः पक्षेऽण् युवयोर्युष्माकंवायं युष्मदीयः अस्मदीयः तस्मिन्नणिचयुष्माकास्माकौ युष्मदस्म
दोरेतावादेशौस्तः खञि अणिच यौष्माकीनः आस्माकीनः यौष्माकः आस्माकः तवकममकावेकवचने एकार्थ
वाचिनोर्युष्मदस्मदोस्तवकममकौस्तः खञिअणिच तावकीनः तावकः मामकीनः मामकः छेच प्रत्ययोत्तरप
दयोश्च मपर्यंतयोरेकार्थयोस्त्वमौस्तः प्रत्ययेउत्तरपदेच त्वदीयः मदीयः त्वत्पुत्रः मत्पुत्रः अर्द्धाद्यत् अर्ध्यः प
राधसाधमोत्तमपूर्वाच्च परार्ध्यं अधमार्ध्यं उत्तमार्ध्यं दिक्पूर्वपदाट्ठञ्च पौर्वार्धिकं पूर्वार्ध्यं ग्रामजनपदेक
देशादञ्ठञौ ग्रामैकदेशवाचिनोजनपदैकदेशवाचिनश्च दिक्पूर्वपदादर्धान्तादञ्ठञौस्तः इमेऽस्माकंग्रामस्य
जनपदस्यवा पौर्वार्धाः पौर्वार्धिकाः ग्रामस्यपूर्वस्मिन्नर्धेभवा इति तद्धितार्थेसमासः ठञ्ग्रहणंस्पष्टार्थं अ
चैवमुक्तेयतोऽप्यनुकर्षःसंभाव्येत मध्यान्मः मध्यमः अः सांप्रतिके मध्यशब्दादकारप्रत्ययः स्यात्सांप्रतिकेऽर्थे
उत्कर्षापकर्षहीनोमध्योवैयाकरणः मध्यदारु नातिह्रस्वंनातिदीर्घमित्यर्थः द्वीपादनुसमुद्रंयञ् समुद्रसमीपे

अजमभवमिदं दृष्टं कंचेतस्यग्रामस्यवाऽस्मा
पि प्रसक्तउत्कर्षः कार्यः इतःपर्यर्थठञ्ग्रह
णं —२

तद्धितार्थोत्तरपदसमाहारेचेत्यनेनसमा
सः अत्रदिक्संख्येसंज्ञायामितिसूत्रः सा
मेतिसूत्रेणठञ्ग्रहणंनकर्तव्यमिति
र्थः —३

योद्वीपस्तद्विषयाद्द्वीपशब्दाद्यञ् स्यात् द्वैप्यं द्वैप्या कालाट्ठञ् कालवाचिभ्यष्ठञ् स्यात् मासिकं सांवत्सरिकं सायं
प्रातिकः पौनःपुनिकः कथं तर्हि शार्वरस्य तमसो निषिद्धये इति कालिदासः अनुदितौषसरागेति भारविः स
त॰ मानकालीनं प्राक्कालीनमित्यादि च अपभ्रंश एवेति प्रामाणिकाः तत्र जात इति यावत्कालाधिकारः श्राद्धे शर
दः ठञ् स्यात् ऋतव्णोपवादः शारदिकं श्राद्धं विभाषा रोगातपयोः शारदिकः शारदो वा रोगः आतपो वा एत
सि॰कौ॰ १०१ योः किं शारदं दधि निशाप्रदोषाभ्यां च वा ठञ् स्यात् नैशिकं नैशं प्रादोषिकं प्रादोषं श्वसस्तुट् च श्वःशब्दाट्ठञ्
स्यात् तस्य तुडागमः द्वारादीनां च द्वारस्वरव्यल्कशस्वस्तिस्वरस्फ्यकृतस्वादुमृदुश्वसश्वन्स्व एषां न वृद्धिः ऐ
जागमश्च शौवस्तिकः संधिवेलाद्यृतुनक्षत्रेभ्योऽण् संधिवेलादिभ्यः ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽ
|०| ण् स्यात् संधिवेलायां भवं सांधिवेलं ग्रैष्मं तैषं संधिवेला संध्या अमावास्या त्रयोदशी चतुर्दशी पंचदशी
पौर्णमासी प्रतिपत् संवत्सरात्फलपर्वणोः सांवत्सरं फलं पर्व वा सांवत्सरिकमन्यत् प्रावृष एण्यः प्रावृषेण्यः वर्षाभ्यष्ठ
क् वर्षासु साधु वार्षिकं वासः कालात्साधुपुष्प्यत्पच्यमानेष्विति साध्वर्थे सर्वत्राण् च तलोपश्च हेमन्तादण् तलोपश्च सा॰
वेदलोकयोः चकारात् यथाप्राप्तं हैमनं हैमंतं सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च सायमित्यादिभ्यश्च
तुर्भ्यः अव्ययेभ्यश्च कालवाचिभ्यष्ट्युट्युलौ स्तस्तयोस्तुट् च तुटः प्रागनादेशः अनद्यतनमित्यादिनिर्देशात् सायंतनं
चिरंतनं प्राह्णप्रगयोरेदंतत्वं निपात्यते प्राह्णेतनं प्रगेतनं दोषातनं दिवातनं चिरपरुत्परारिभ्यस्त्नो वक्तव्यः चिर
त्नं परुत्नं परारित्नं अग्रादिपश्चाड्डिमच् अग्रिमं पश्चिमं अन्ताच्च अन्तिमं विभाषा पूर्वाह्णापराह्णाभ्यां आभ्यां ट्युट्युलौ वा
स्तः तयोस्तुट् च पक्षे ठञ् पूर्वाह्णेतनं अपराह्णेतनं घकालतनेष्विति अलुक् पूर्वाह्णः सोढोऽस्येति विग्रहे तु पूर्वाह्णतनं अ १०१

पराह्णतनं पौर्वाह्णिकं आपराह्णिकं तत्र जातः सप्तमीसमर्थाज्जात इत्यर्थेऽणादयो घादयश्च स्युः स्रुघ्ने जातः स्रौघ्नः औत्सः राष्ट्रि
यः अवारपारीण इत्यादि प्रावृषष्ठक् एण्यस्यापवादः प्रावृषिकः संज्ञायां शरदो वुञ् ऋत्वणोऽपवादः शारदकाः दत
विशेषाम्नुष्यविशेषाच्च उत्तरपदस्य च अधिकारोयं हनस्तइत्यस्मात्प्राक् अवयवादृतोः अवयववाचिनः पूर्वप
दादृतुवाचिनोऽचामादेरचो वृद्धिः ञ्णिति किति च तद्धिते पूर्ववार्षिकः अपरहैमनः अवयवात्किं पूर्वासु वर्षासु
भवः पौर्ववार्षिकः ऋतोर्वृद्धिमद्विधावयवानामिति तदन्तविधिः पूर्वत्र इह तु न अवयवत्वाभावात् सुसर्वार्धाज्जनपद
स्य उत्तरपदस्य वृद्धिः सुपाञ्चालः सर्वपाञ्चालः अर्धपाञ्चालः जनपदतदवध्योरिति वुञ् सुसर्वार्धदिक्शब्देभ्यो
जनपदस्येति तदन्तविधिः दिशोऽमद्राणां दिग्वाचकाज्जनपदवाचिनो वृद्धिः पूर्वपाञ्चालकः दिशः किं पूर्वपाञ्चा
लानामयं पौर्वपाञ्चालः अमद्राणां किं पौर्वमद्रः योगविभाग उत्तरार्थः प्राचां ग्रामनगराणां दिशः परेषां नगरवा
चिनां ग्रामवाचिनां नामवयवस्य वृद्धिः पूर्वेषुकामशम्यां भवः पूर्वेषुकामशमः नगरे पूर्वपाटलिपुत्रकः पूर्वाह्ण
पराह्णार्द्रामूलप्रदोषावस्कराद्वुन् पूर्वाह्णकः अपराह्णकः आर्द्रकः मूलकः प्रदोषकः अवस्करकः पथः पन्थ च
पथि जातः पन्थकः अमावास्याया वा अमावास्यकः आमावास्यः अ च अमावास्यः सिन्धुपकराभ्यां कन् सिन्धुकः
कच्छाद्यणोमन्त्वष्ठञ्जिञ्च प्राप्ते अपकरकः औत्सर्गिकोऽण्प्राप्ते अणञौ च क्रमात् सैन्धवः आपकरः श्रवि
यं ष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् एभ्यो नक्षत्रवाचिभ्यः परस्य जातार्थप्र वकुलाहुतिको-२
त्ययस्य लुक् स्यात् लुक्तद्धितलुकि तद्धितलुकि उपसर्जनस्त्रीप्रत्ययस्य लुक् स्यात् श्रविष्ठासु जातः श्रविष्ठः
फल्गुनः इत्यादि चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानं चित्रायां जाता चित्रा रेवती रोहिणी आभ्यो लुक्तद्धितलु

किंकृते विष्वल्यादेराकृतिगणत्वात् नक्षी२ फाल्गुन्यषाढाभ्यां टानौ वक्तव्यौ स्त्रियामित्येव फल्गुनी अषाढा
श्रविष्ठाषाढाभ्यां छण् वक्तव्यः स्त्रियामपि श्राविष्ठीयः आषाढीयः जे प्रोष्ठपदानाम् प्रोष्ठपदाना
ते मुत्तरपदस्याचामादेरचो वृद्धिर्जातेऽर्थे नातिकिं तिच प्रोष्ठपदासु जातः प्रोष्ठपदो माणवकः जे इति किं १
प्रोष्ठपदासु भवः प्रौष्ठपदः बहुवचननिर्देशात्पर्यायो गृह्यते भद्रपादः स्थानान्तगोशालखरशालाच्च
सि॰कौ॰ एभ्यो जातार्थस्य लुक् स्यात् गोस्थाने जातः गोस्थानः गोशालः खरशालः विभाषा सेनेति नपुंसकत्वे
१०२ ह्रस्वत्वं वत्सशालाभिजिदश्वयुक्शतभिषजो वा एभ्यो जातार्थस्य लुग्वा स्यात् वत्सशालः वात्सशाल
102 इत्यादि जातार्थे प्रतिप्रसूतो ण्यवादिश्च वक्तव्यः शातभिषजः शातभिषः शातभिषक नक्षत्रेभ्यो बहु
लम् जातार्थप्रत्ययस्य बहुलं लुक् स्यात् रोहिणः रौहिणः कृतलब्धक्रीतकुशलाः तत्रेत्येव स्रुघ्ने
कृतो लब्धः क्रीतः कुशलो स्रौघ्नः प्रायभवः तत्रेत्येव स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः उपजानूप
कर्णोपनीवेष्ठक् औपजानुकः औपकर्णिकः औपनीविकः संभूते स्रुघ्ने संभवति स्रौघ्नः कोशाड्ढञ्
कौशेयं वस्त्रं कालात्साधुपुष्प्यत्पच्यमानेषु हेमन्ते साधुः हैमन्तः प्राकारः वसन्ते पुष्प्यन्ति वासन्त्यः कुन्द
लताः शरदि पच्यन्ते शारदाः शालयः उप्ते च हेमन्ते उप्यन्ते हैमन्ता यवाः आश्वयुज्या वुञ् ठञोऽपवादः
आश्वयुज्यामुप्ता आश्वयुजकाः माषाः ग्रीष्मवसन्तादन्यतरस्याम् पदे वुञ् ग्रैष्मकं ग्रैष्मं वासं
न्तकं वासन्तं देयमृणे कालादित्येव मासे देयमृणं मासिकं कलाप्यश्वत्थयवबुसाद्वुन् य रामायनमः
स्मिन् काले मयूराः कलापिनो भवति स उपचारात् कलापी तत्र देयमृणं कलापकं अश्वत्थस्य फ १०२

लभ्यस्य: तद्युक्तः कालोऽस्य प्राप्य: यस्मिन्कालेऽस्य प्राप्याः फलं तिन तद्देयमाप्स्यत्के यस्मिन्नृयवस्तु समुत्पद्यते त
त्देयं यावद्वुञकं ग्रीष्मावरसमाद्वुञ् ग्रीष्मे देयमृणं ग्रैष्मकं आवरसमकं संवत्सराग्रहायणीभ्यां
ठञ्च चाद्वुञ् सांवत्सरिकं सांवत्सरकं आग्रहायणिकं आग्रहायणकं व्याहरति मृगः कालवा
चिनः सप्तम्यन्तात्प्रत्ययतद्वृत्तथे अणादयः यो व्याहरति मृग उच्यते निशायां व्याहरति नैशो मृ
गः नैशिकः तदस्य सोढं कालादित्येव निशासहचरितमध्ययनं निशा तत्सोढमस्य नैशः
नैशिकः तत्र भवः स्रुघ्ने भवः स्रौघ्नः राष्ट्रियः दिगादिभ्यो यत् दिश्यं वर्ग्यं शरीरावयवाच्च दन्त्यं कर्ण्यं प्रा
चां नगरान्ते. प्राचां देशे नगरान्ते गम्यपूर्वपदस्योत्तरपदस्य चामादेरचां वृद्धिर्णिति किति च सुह्मनगरे भवः सौह्म
नागरः प्राचां किं मद्रनगरमुदक्षु तत्र भवः माद्रनगरः जंगलधेनुवलजान्तस्य विभाषितमुत्तरं जंगलाद्यन्तस्य
ग्रामस्य पूर्वस्य चामादेरचां वृद्धिरुत्तरपदस्य णिति किति च कुरुजंगले भवं कौरुजंगलं कौरुजांगलं वैश्वधेनव
वैश्वधेनवं सौवर्णवलजं सौवर्णवालजं दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् दार्त्तेयं कलशिर्ढट्: तत्र भवं का
लशेयं ग्रीवाभ्योऽण्च चाड्ढञ् ग्रैवेयं ग्रैवं गम्भीराञ्ञ्यः गम्भीरे भवं गाम्भीर्यं पंचजनादुपसंख्यानं पाञ्चज
न्यः अव्ययीभावाच्च परिमुखं भवं पारिमुख्यं परिमुखादिभ्य एव इष्यते नेह औपकूलं अन्तःपूर्वपदाट्ठञ्
अव्ययीभावादित्येव वेश्मनि अन्तर्वेश्मं तत्र भवं आन्तर्वेश्मिकं आन्तर्गणिकं अध्यात्मादेष्ठञिष्यते अध्यात्मं भ
वमाध्यात्मिकं अनुशतिकादीनां च पूर्वपदस्योभयपदवृद्धिः स्यात् ञिति णिति किति च आधिदैविकं आधिभौ
तिकं ऐहलौकिकं पारलौकिकं अध्यात्मादिराकृतिगणः देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्

न॰
सि॰कौ॰
१२

103

त्वां पेच्वानां वृद्धिः आमावादेरब्यात गाातिकितिच दाविकं देविकाकूले भवाः दाविकाकूलाः शालयः शिंश
पायाः विकारः शांशपश्चमसः पलाशादिभ्यो वेत्यञ् दित्यौहदृ दार्घसत्रं दीर्घसत्रे दार्घसत्रं श्रेयसि भवं श्रा
यसं ग्रामात्पर्यनुपूर्वात् ठञ् स्यात् अव्ययीभावादित्येव पारिग्रामिकः आनुग्रामिकः जिह्वामूलाङ्गुलेश्छः
जिह्वामूलीयं अङ्गुलीयं वर्गान्ताच्च कवर्गीयं अशब्दे यत्खावन्यतरस्यां प्रकृत्यै वाङ्कः मद्वर्ग्यः मद्वर्गी
णः मद्वर्गीयः अशब्दे किं कवर्गीयो वर्णः कर्णललाटात्कनलंकारे कर्णिका ललाटिका तस्य व्याख्या
न इति च व्याख्यातव्यनाम्नः सुपां व्याख्यानः सौपो ग्रन्थः तैङः कार्तः तत्र भवं सोऽपि बह्वचोन्तोदात्तात् षत्व
णत्वयोर्विधायकं शास्त्रं षत्वणत्वं तस्य व्याख्यानस्तत्र भवो वा षात्वणत्विकः क्रतुयज्ञेभ्यश्च सामसाध्येषु
यागेषु क्रतुः प्रसिद्धो तत्रान्यतरोपादानेन सिद्धे उभयोपादानसामर्थ्यादसोमका अपीह गृह्यन्ते अग्निष्टो
मस्य व्याख्यानस्तत्र भवो वा आग्निष्टोमिकः वाजपेयिकः पाकयज्ञिकः नावयज्ञिकः बहुवचनस्य
रूपविधिनिरासार्थं अनन्तोदात्तार्थः आरम्भः अध्यायेष्वेवर्षेः ऋषिशब्देभ्यो लक्षणया व्याख्येयग्रन्थप्रवृ
त्तिभ्यो भवे व्याख्याने चाध्याये ठञ् स्यात् वशिष्ठेन दृष्टो ग्रन्थः वशिष्ठस्तस्य व्याख्यानस्तत्र भवो वा वाशि
ष्ठिकोऽध्यायः अध्यायेषु किं वाशिष्ठी ऋक् पौरोडाशपुरोडाशात्ष्ठन् पुरोडाशसहचरितो मन्त्रः पुरोडाशः
स एव पौरोडाशः ततष्ठन् पौरोडाशिकः पुरोडाशिकः छन्दसो यदणौ छन्दस्यः छान्दसः द्व्यजृद्ब्राह्मणर्क्
प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक् द्व्यचः ऐष्टिकः पाशुकः ऋतः चातुर्होतृकः ब्राह्मणिकः आर्चिकः १२ १६
इत्यादि अणृगयनादिभ्यः ठञादेरपवादः आर्गयनः औपनिषदः वैयाकरणः तत आगतः ठञ्

दागतः स्रौघ्नः ठगायस्थानेभ्यः शुल्कशालाया आगतः शौल्कशालिकः शुण्डिकादिभ्योऽण् आयस्थानठकश्छ
दीनां चापवादः शुण्डिकादागतः शौण्डिकः कार्कणः तैर्थः विद्यायोनिसंबंधेभ्यो वुञ् औपाध्यायकः पैतामह
कः ऋतष्ठञ् वुञोऽपवादः हौतृकं भ्रातृकं पितुर्यच्च चाट्ठञ् रीङृतः यस्येति लोपः पित्र्यं पैतृकं गोत्रादङ्कव
त् विदेभ्य आगतं बैदं गार्ग्यं दाक्षं औपगवकं नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानां नञः परेषां शुच्यादि
पंचानामादेरचो वृद्धिः पूर्वपदस्य तु वाभिदादौ आशौचं आनैश्वर्यं अनैश्वर्यं आक्षैत्रज्ञं अक्षैत्रज्ञं आकौशलं अ
कौशलं आनैपुणं हेतुमनुष्येभ्योऽन्यतरस्यां रूप्यः समादागतं समरूप्यं विषमरूप्यं पक्षे गहादित्वाच्छः
समीयं विषमीयं देवदत्तरूप्यं देवदत्त मयड्च सममयं विषममयं देवदत्तमयं प्रभवति तत इत्येव हिमवतः
प्रभवति हैमवती गंगा विदूराञ्ञ्यः विदूरात्प्रभवति वैदूर्यो मणिः तद्गच्छति पथिदूतयोः स्रुघ्नं गच्छति स्रौघ्नः प
या दूतो वा अभिनिष्क्रामति द्वारं तदित्येव स्रुघ्नं अभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारं अधिकृत्य कृते ग्र
थे तदित्येव शारीरकमधिकृत्य कृतो ग्रंथः शारीरकीयः शारीरकं भाष्यमिति त्वभेदोपचारात् शिशुक्रंदय
मसभद्वंद्वेंद्रजननादिभ्यश्छः शिशूनां क्रंदनं शिशुक्रंदः तमधिकृत्य कृतो ग्रंथः शिशुक्रंदीयः यमसभा
यमसभं क्लीबत्वं निपातनात् यमसभीयः किरातार्जुनीयं इंद्रजननादिराकृतिगणः इंद्रजननीयं विरुद्धभो
जनीयं सोऽस्य निवासः स्रुघ्नो निवासोऽस्य स्रौघ्नः अभिजनश्च स्रुघ्नोऽभिजनोऽस्य स्रौघ्नः यत्र स्वयं वसति निवासः
यत्र पूर्वैः उषितं अभिजन इति विवेकः आयुधजीविभ्यः छः पर्वते पर्वतवाचिनः प्रथमातादभिजनशब्दाद
स्यत्यर्थे छः स्यात् हृद्गोलः पर्वतोऽभिजन एषामायुधजीविनां ते हृद्गोलीया आयुधेति किं ऋक्षोदः पर्वतोऽ
भिजनो येषां ते आर्क्षोदाः ब्राह्मणाः शण्डिकादिभ्यो ञ्यः शाण्डिकोऽभिजनोऽस्य शाण्डिक्यः सिन्धुतक्षशि

लादिभ्यः णाञौ सिंधादिभ्योऽण् तक्षशिलादिभ्योऽञ् स्याद्वुकेऽर्थे सैंधवः तक्षशिलानगरी अभिजनोऽ
त· स्य ताक्षशिलः तूदीशालातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः तूदी अभिजनोऽस्य तौदेयः शाला
तुरीयः वार्मतेयः कौचवार्यः भक्तिः सोऽस्येत्यनुवर्तते भजते सेव्यते इति भक्तिः स्रुघ्नो भक्तिरस्य स्रौघ्नः अचित्ताद्
सि·कौ· देशकालाट्ठञ् अपूपा भक्तिरस्य आपूपिकः पायसिकः अचित्तादिति किं देवदत्तः अदेशादिति स्रौघ्नः अकालादिति
२४ ग्रैष्मः महाराजाट्ठञ् माहाराजिकः वासुदेवार्जुनाभ्यां वुञ् वासुदेवकः अर्जुनकः गोत्रक्षत्रियाख्येभ्यो
बहुलं वुञ् अणोऽपवादः परत्वाद्वृद्धाच्छं बाधते ग्लुचुकायनिर्भक्तिरस्य ग्लौचुकायनिकः नाकुलकः बहुलग्रह
104 णान्नेह पाणिनो भक्तिरस्य पाणिनीयः जनपदिना जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने जन
पदस्वामिवाचिना बहुवचने जनपदवाचिना समानशब्दानां जनपदवत्सर्वं प्रत्ययः प्रकृतिश्च जनपदतद्
वध्योश्चेति प्रकरणे ये प्रत्ययाः उक्तास्तेऽत्रापि दृश्यन्ते अंगाः जनपदो भक्तिरस्य आंगकः अंगाः क्षत्रिया भक्तिरस्यां
गकः जनपदिनेति किं पाञ्चाला ब्राह्मणा भक्तिरस्य पाञ्चालः जनपदेनेति किं पौरवो राजा भक्तिरस्य पौरवीयः तेन प्रो
क्तं पाणिनिना प्रोक्तं पाणिनीयं तित्तिरिवरतन्तुखण्डिकोखाच्छण् छन्दोब्राह्मणानीति तद्विषयाणि तित्तिरिणा प्रोक्त
मधीयते तैत्तिरीयाः काश्यपकौशिकाभ्यामृषिभ्यां णिनिः काश्यपेन प्रोक्तमधीयते काश्यपिनः कलापिवैशं

वैशंपायनान्तेवासिनो नव आलंबि १ कलिंग २ कमल ३ ऋचाभ ४ आरुणि ५ ताण्ड्य ६ श्यामायन ७ कठ ८ कलापि ९ इति नव

पायनान्तेवासिभ्यश्च कलाप्यन्तेवासिभ्यः हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः वैशंपायनान्तेवासिभ्यः आ

कलाप्यन्तेवासिन आहाः हरिद्रुः १ छगली २ तुंबुरु ३ उलप ४ = ५

लंबिनः पुराणप्रोक्तेषु ब्राह्मणकल्पेषु तृतीयान्तात्प्रोक्तार्थे णिनिः स्यात् यत्प्रोक्तं पुराणप्रोक्तं चेद्ब्राह्मणं
कल्पश्च भवति शाट्यायनिनः कल्पे पिंगः पैंगी कल्पः पुराणेति किं याज्ञवल्क्यानि ब्राह्मणानि आश्मरथ्यः का
ल्पः अण् आपत्यस्येति यलोपः कठचरकाल्लुक् आभ्यां प्रोक्तप्रत्ययस्य लुक् स्यात् कठेन प्रोक्तमधीयते कठाः २४

चरकाः कलापिनोऽण् कलापिना प्रोक्तमधीयते कालापाः नान्तस्य टिलोपे सब्रह्मचारीपीठसर्पिकलापि
कौथुमितैतिलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसद्मसुपर्वणामुपसंख्यानं इत्युपसंख्यानाट्टिलो
पः छगलिनो ढिनुक् छागलिना प्रोक्तमधीयते छागलेयिनः पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः
पाराशर्येण प्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणः भिक्षवः शिलालिनो नटाः कर्मन्दकृशाश्वादिनिः
भिक्षुनटसूत्रयोरित्येव कर्मन्देन प्रोक्तमधीयते कर्मन्दिनः भिक्षवः कृशाश्विनो नटाः तेनैकदिक् सु
दाम्ना अद्रिणा एकदिक् सौदामिनी तसिश्च स्वरादिपाठादव्ययत्वं पीलुमूलेन एकदिक् पीलुमूलतः अ
सायच्च वा तसिः अणोऽपवादः उरसा एकदिक् उरस्यः उरस्तः उपज्ञाते तेनेत्येव पाणिनिनोपज्ञातं पाणि
नीयं कृते ग्रन्थे वररुचिना कृतो वाररुचो ग्रन्थः संज्ञायां तेनेत्येव अग्र्यार्थमिदं मक्षिकाभिः कृतं मा
क्षिकं मधु कुलालादिभ्यो वुञ् तेन कृते संज्ञायां कुलालेन कृतं कौलालकं वारुडकं क्षुद्राभ्रमरव
टरपादपादञ् तेन कृते संज्ञायां क्षुद्राभिः कृतं क्षौद्रं भ्रामरं वाटरं पादपं तस्येदं उपगोरिदमौपग
वं वहेस्तुरणिट् च संवोढुः स्वं सांवहित्रं अग्नीधः शरणे रण् भं च अग्निमिन्धे अग्नीत् तस्य स्थानं आग्नीध्रं
तत्स्थानलोपश्चाग्नीध्रः समिधामाधाने षेण्यण् सामिधेन्यो मन्त्रः सामिधेनी ऋक् रथाद्यत् रथ्यं चक्रं
पत्त्रपूर्वादञ् पत्त्रं वाहनं अश्वस्येदं आश्वं रथं पत्त्राध्वर्युपरिषदश्च पत्त्राद्वाह्ये अश्वस्येदं वहनीयं
आश्वं आध्वर्यवं पारिषदं हलसीराट्ठक् हालिकं सैरिकं द्वन्द्वाद्वुन्वैरमैथुनिकयोः काकोलूकिका कु
त्सकुशिकिका। द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः देवासुरं गोत्रचरणाद्वुञ् औपगविकं चारणाद्धर्मा

म्नाययोरितिवक्तव्यं काठकं· संघांकलक्षणेष्वञ्यञिञामण् घोषग्रहणमपि कर्तव्यं अत्र वैदः संघोंको घो
तं· षोवा वैदः· वैदं लक्षणं यत्र गार्गः गार्गं इत्र दाक्षः दाक्षं परं पशसंवधोकः साक्षाक्षुलक्षणं शाकलाद्वा
अणाद्योक्तेर्थे पक्षे चरणत्वाद्वुञ् शाकलेन प्रोक्तमधीयते शाकलाः· तेषां संघोंको घोषो वा शाकलः· लक्षणे।
सि·कौ· क्लीवता छंदोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः छन्दोगानां धर्म आम्नायो वा छान्दोग्यं औक्थिक्यं याज्ञि
१०५ क्यं बाह्वृच्यं नाट्यं चरणाद्धर्माम्नाययोरित्युक्तं तत्साहचर्यान्नटशब्दादपि तयोरेव नदण्डमाणवान्तेवासि
105 षु दण्डप्रधाना माणवा दण्डमाणवा अन्तेवासिनः शिष्यास्तेषु वुञ्न स्यात् दाक्षाः दण्डमाणवाः शिष्या वा रैवतिकादिभ्य
श्छः तस्येदमित्यर्थे वुञोऽपवादः रैवतिकीयः वैजवापीयः कौपिञ्जलहास्तिपदादण्वाच्यः कपिञ्ज
लस्यापत्यं इहैव निपातनादण् तदन्तादण् कापिञ्जलः गोत्रवुञोऽपवादः हस्तिपादस्यापत्यं हास्तिपा
दः चरणवुञोरपवादः आथर्वणिकस्येकलोपश्च अण् आथर्वणिकस्यायं आथर्वणो धर्म आम्नायो
वा॥ इति शैषिकाः समाप्ताः इति॥ तस्य विकारः अश्मनो विकारे टिलोपो वक्तव्यः अश्मनो विकारः आश्मः
भास्मनः मार्तिकः अवयवे च प्राण्योषधिवृक्षेभ्यः चाद्विकारे मयूरस्यावयवो विकारो वा मायूरः मौर्वं का
ण्डं भस्म वा पैप्पलं बिल्वादिभ्योऽण् बैल्वः कोपधाच्च अण् अञोपवादः तर्कु तार्कवं तैत्तिडीकं त्रपुजतु
नोः षुक् आम्पामण्यस्माद्विकारे एतयोः षुगागमः त्रापुषं जातुषं ओरञ् दैवदारवं अनुदात्तादेश्च दाधि
त्थं कापित्थं पलाशादिभ्यो वा पालाशं कारीरं शाम्याः ष्लञ् शामीलं भस्म षित्त्वान्ङीष् शामीली स्रुक् ११
मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः प्रकृतिमात्रान्मयड्वा स्यादविकारावयवयोः अश्ममयं आश्मनं अश्म

दैस्यादिकं मौञ्जः सूपः कार्पासमाच्छादनं नित्यं वृद्धशरादिभ्यः आम्रमयं शरमयं एकाचो नित्यं तन्मयं क
थं तर्हि आप्यमन्मयमिति तस्येदमित्यण् तेनान्वार्थेष्यन् गोश्च पुरीषे गोः पुरीषे गोमयं पिष्टाच्च मयट्
स्यात् विकारे पिष्टमयं भस्म कथं पैष्टी सुरेति सामान्यविवक्षायामस्येदमित्यण् संज्ञायां कन् पिष्टादित्ये
व पिष्टस्य विकारविशेषः पिष्टकः पूपोपूपः पिष्टकः स्यात् व्रीहेः पुरोडाशे मयट् स्यात् बिल्वाद्य
णोऽपवादः व्रीहिमयः पुरोडाशः व्रैहमन्यत् असंज्ञायां तिलयवाभ्यां तिलमयं यवमयं संज्ञायां तु तैल
यावकः तालादिभ्योऽण् अञ्मयटोरपवादः तालाद्धनुषि तालं धनुः अन्यत्तालमयं इन्द्रायुधं जातरू
पेभ्यः परिमाणे अण् स्यात् बहुवचनात्पर्यायग्रहणं हाटकः तापनीयः सौवर्णो निष्कः परिमाणे किं
हाटकमयी यष्टिः प्राणिरजतादिभ्योऽञ् शौकं वाकं राजतं जितञ्च नतमप्रत्ययात् जिद्धो विकारावय
वः प्रत्ययस्तदन्तादञ्स्यात्तयोरेवार्थयोः मयटोऽपवादः शामीलस्य शामीलं दाधित्थः दाधित्थं जितः
किं बैल्वमयं क्रीतवत्परिमाणात् प्राग्वतेष्ठञ् इत्यारभ्य क्रीताद्यर्थे ये प्रत्ययाः येनोपाधिना परिमाणाद्विहि
तास्ते तथैव विकारे इति दिश्यते असादीनामपवादः निष्केण क्रीतं नैष्किकं एवं निष्कविकारोऽपि नैष्किकः
शतस्य विकारः शत्यः शतिकः उष्ट्राद्वुञ् प्राण्यञोऽपवादः औष्ट्रकः उमोर्णयोर्वा औमं औमकं औ
र्णं और्णकं वुञ्भावे यथाक्रममणञौ एण्या ढञ् ऐणेयं एणस्यतु ऐणं गोपयसोर्यत् गव्यं पयस्यं द्रोश्च
द्रुद्द्रतः तस्य विकारोऽवयवो वा द्रव्यं माने वयः द्रोरित्येव द्रुवयं यौतवं द्रुवयं पाय्यमिति मानार्थकं ने
यं फले लुक् विकारावयवप्रत्ययस्य लुक् स्यात् फले आमलक्याः फलं आमलकं लक्षादिभ्योऽण् वि

ते॰

मि॰ को॰ १०६

अशोके करवीरे

106

धानसामर्थ्यान्न लुक् ॥ लाते न्यग्रोधस्य च केवलस्य अस्य न हद्विरेजागमस्य नैयग्रोधं जंबा वा जंबुशब्दात् फ
ले गावा स्यात् जांबवं पदे त्र्यान्न तस्य लुक् जंबु लुचं जंब्वाः फलप्रत्ययस्य लुब्वा स्यात् लोपयुक्तवत्
जंब्वाः फलं जंबूः फलपाकस्य घासि पतस्यमानं व्रीहयः मुद्गाः पुष्पमूलेषु बहुलं मल्लिकायाः पुष्पं
मल्लिका जात्याः पुष्पं जाती विदार्या मूलं विदारी बहुलग्रहणान्नेह पाटलानि पुष्पाणि सालानि मूलानि
बाहुलकाच्च लुक् हरीतक्यादिभ्यश्च प्रथ्यः फलप्रत्ययस्य लुप् स्यात् हरीतक्यादीनां लिंगमेव
प्रकृतिवत् हरीतक्याः फलानि हरीतक्यः कंसीयपरशव्ययोर्यञञौ लुक् च कंसीयपरशव्यशब्दाभ्यां यञञौ स्तः
छयतोश्च लुक् कंसाय हितं कंसीयं तस्य विकारः कांस्य परशवे हितं परशव्यं तस्य पारशवः ॥ श्रीः प्राग्दी
व्यतीयाः समाप्ताः श्रीः ॥ प्राग्वहतेष्ठक् तद्वहतीत्यतः प्राक् ठगधिक्रियते तदाहेति माशब्दादिभ्य उ
पसंख्यानं माशब्दः कारि इति य आह स माशब्दिकः स्वागतादीनां च ऐज् न स्यात् स्वागतमित्याह स्वाग
तिकः स्वाध्वरिकः स्वगस्यापत्यं स्वागिः व्यंगस्यापत्यं व्यांगिः व्यडस्यापत्यं व्याडिः व्यवहारेण चरति व्या
वहारिकः स्वपतौ साधुः स्वापतेयं ओ हो प्रभूतादिभ्यः प्रभूतमाह प्राभूतिकः पार्याप्तिकः पृच्छतौ सु
स्नातादिभ्यः सुस्नातं पृच्छति सौस्नातिकः सौखशायनिकः आनुशतिकादिः गच्छतौ परदारादिभ्यः पारदारिकः
गौरुतल्पिकः तेन दीव्यति खनति जयति जितं अक्षैर्दीव्यति आक्षिकः अभ्र्या खनति आभ्रिकः अक्षैर्जय
ति आक्षिकः अक्षैर्जितं आक्षिकं संस्कृतं दध्ना संस्कृतं दाधिकं कुलत्थकोपधादण् ठकोऽपवादः कु १०६
लत्थैः संस्कृतं कौलत्थं तीत्तिडीकं तरति उडुपेन तरति औडुपिकः गोपुच्छाट्ठञ् गोपुच्छिकः नौद्व्यचः

ष्ठन् नाविकः घटिकः बाहुभ्यांतरति बाहुकाः स्त्री चरति तृतीयांताद्गच्छति भक्षयतीत्यर्थेष्वेषु ष्ठक् स्यात् हस्तिना
चरति हास्तिकः शाकटिकः दध्ना चरति दाधिकः आकर्षात्ष्ठल् आकर्षो निकषोपलः आकर्षादिति पाठांतरं
तेनचरति आकर्षिकः षित्वान्ङीष् आकर्षिकी पर्पादिभ्यष्ठन् पर्पेणचरति पर्पिकः पर्पिकः यत्नपीठेनप
गवश्चरति सपर्पः अश्विकः [illegible]कः श्वगणाट्ठञ्च चात्ष्ठन् श्वादेरिञि एवं न स्वभस्त्रस्यापत्यंस्वाभस्त्रिः
श्वादेरिञि तदादिविधौ चेतदेवज्ञापकं इकारादाविति वाच्यं श्वगणेनचरति श्वागणिकः श्वागणिकी श्व
गणिकः श्वगणिकी पदात्तस्मान्यतरस्यां श्वादेरं गम्यपदशब्दात्तस्यज्यो श्वापदस्येदं श्वापदं शौवापदं वेतनादि
भ्योजीवति वेतनेनजीवति वैतनिकः धानुष्कः वस्त्रक्रयविक्रियाट्ठन् वस्नेनमूल्येनजीवति वस्निकः क्रयवि
क्रयग्रहणंसंघातविग्रहीतार्थं क्रयविक्रयिकः क्रयिकः विक्रयिकः आयुधाच्छच चात्ष्ठन् आयुधेनजीवति
आयुधीयः आयुधिकः हरत्युत्संगादिभ्यः उत्संगेनहरत्यौत्संगिकः भस्त्रादिभ्यष्ठन् भस्त्रयाहरति भस्त्रिकः षि
त्वान्ङीष् भस्त्रिकी विभाषाविवधात् विवधेनहरति विवधिकः पक्षेठक् वैवधिकः एकदेशविकृतस्यानन्यत्वा
द्वीवधादपि वीवधिकः वीवधिकी विवधवीवधशब्दौ उभयतोबद्धशिक्ये स्कंधवाह्यकाष्ठेवर्तेते अण्कुटि
लिकायाः कुटिलिका व्याधानांगतिविशेषः कर्मारोपकरणंच तेनलोहंच कुटिलिकयाहरति मृगान् अंगारा
न्कौटिलिकोव्याधः कर्मारः निर्वृत्तेक्षद्यूतादिभ्यः अक्षद्यूतेननिर्वृत्तमाक्षद्यूतिकं वैरं ठेर्मम्नित्यं त्रिप्रत्यया
तप्रकृतिकात्तृतीयांतान्निर्वृत्तेऽर्थे मम् स्यान्नित्यं ड्वितःक्त्रिः कृत्यानिर्वृत्तं कृत्रिमं पक्त्रिमं भावप्रत्ययांतादिमप्व
क्तव्यः पाकेननिर्वृत्तं पाकिमं त्यागिमं अपमित्ययाचिताभ्यांकक्कनौ अपमित्यपतिलपवत् अपमित्यनिर्वृत्तमापमित्य

ते· केयाचितेननिर्वृत्तं याचितकं संसृष्टे दधिनासंसृष्टं दाधिकं चूर्णादिनिः चूर्णैः संसृष्टाः चूर्णिनोऽपूपाः लवणाल्लुक
लवणेनसंसृष्टोलवणः सूपः लवणाशाक मुद्गादण् मौद्ग ओदनः व्यञ्जनैरुपसिक्ते दध्ना उपसिक्तं दाधिकं
सि·कौ· ओजःसहोम्भसावर्तते ओजसिकः सूरः साहसिकश्चौरः आम्भसिको मत्स्यः तत्प्रत्यनुपूर्वमीपलोमकूलं द्वि
१८ तीयान्तादस्माद्वर्तते इत्यस्मिन्नर्थे ठक्स्यात् क्रियाविशेषणात्वाद्द्वितीया प्रतीपंवर्तते प्रातीपिकः आन्वीपिकः प्रातिलो
मिकः आतिकूलिकः आनुकूलिकः परिमुखं च परिमुखं वर्तते पारिमुखिकः चात् पारिपार्श्विकः प्रयच्छति गर्ह्यं द्वि
गुणार्थं द्विगुणं तत्प्रयच्छति द्वैगुणिकः त्रैगुणिकः वृद्धेर्वृधुषिभावो वक्तव्यः वार्धुषिकः कुसीददशैकाद
शात् ष्ठन् ष्ठचौ गर्ह्यार्थाभ्यामाभ्यामेतौ स्तः प्रयच्छत्यर्थे कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदं तत्प्रयच्छति कुसीदि
कः कुसीदिकी एकादशार्थत्वादेकादश ते च ते वस्तुतो दश चेति विग्रहे आकारः समासान्तः इहैव सूत्रे निपात्यते
दशैकादशिकः दशैकादशिकी दशैकादशान्प्रयच्छतीत्युत्तमर्णो वेद्यापि तद्धितार्थः उञ्छति बदराण्युञ्छति
बादरिकः रक्षति समाजं रक्षति सामाजिकः शब्ददर्दुरं करोति शब्दं करोति शाब्दिकः दार्दुरिकः पक्षिमत्स्यमृ
गान्हन्ति स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणं मत्स्यपर्यायेषु मीनस्यैव पक्षिणो हन्ति पाक्षिकः शाकुनिकः
मायूरिकः मात्स्यिकः मैनिकः शाकुनिकः मार्गिकः हारिणिकः सारङ्गिकः परिपन्थं च तिष्ठति अस्माद्द्वितीयान्ता
त्तिष्ठत्यर्थे च ठक् स्यात् पन्थानं वर्जयित्वा व्याप्य वा तिष्ठति पारिपन्थिकश्चौरः परिपन्थं हन्ति पारिपन्थिकः माथो
५८ त्तरपदपदव्यनुपदं धावति दण्डाकारो माथः दण्डमाथः दण्डमाथं धावति दाण्डमाथिकः पादविकः आनुपदिकः
आक्रन्दाट्ठञ्च अस्मात्ठञ्स्याच्चात्ठक् धावत्यर्थे आक्रन्दः विनारोदनस्थानं तं धावति आक्रन्दिकः पदोत्तरपदं १८
गृह्णाति एवं पदं गृह्णाति पौर्वपदिकः औत्तरपदिकः प्रतिकण्ठार्थललामं च एभ्यो गृह्णात्यर्थे ठक् स्यात् प्रति

कं गृह्णाति प्रातिकण्ठिकः आर्थिकः लालामिकः धर्मं चरति धार्मिकः अधर्माच्चेति वक्तव्यं आधर्मिकः प्रति
पथमेति ठञ्च प्रतिपथमेति प्रातिपथिकः प्रतिपथिकः समवायान्समवैति सामवायिकः सामूहिकः परि
षदो ण्यः परिषदं समवैति पारिषद्यः सेनाया वा ण्यः स्यात् पक्षे ठक् सैन्याः सैनिकाः संज्ञायां ललाटकु
क्कुट्यौ पश्यति लालाटिकः सेवकः कुक्कुटीशब्देन तत्पतनार्हः स्वल्पदेशो लक्ष्यते कौक्कुटिकः भिक्षुः तस्य धर्म्यं
आपणस्य धर्म्यं आपणिकं अण् महिष्यादिभ्यः महिष्या धर्म्यं माहिषं याजमानं ऋतोऽञ् यातुर्धर्म्यं यात्रं
नराच्चेति वक्तव्यं नरस्य धर्म्यं नारी विशसितुरिड्लोपश्चाञ्वक्तव्यः विशसितुर्धर्म्यं वैशस्तं विभाजयितुरि
लोपश्चाञ्वक्तव्यः विभाजयितुर्धर्म्यं वैभाजित्रं अवक्रयः षष्ठ्यन्ताट्ठक् स्यादवक्रयेऽर्थे आपणस्यावक्रयः आ
पणिकः राजग्राह्यद्रव्यमवक्रयः तदस्य पण्यं अपूपाः पण्यमस्य आपूपिकः लवणाट्ठञ् लावणिकः कि
सरादिभ्यष्ठन् किसरं पण्यमस्य किसरिकः स्त्रियां ङीष् किसरिकी किसरनलदउशीरगुग्गुल्वादिः किसरादयः स
र्वे सुगन्धिद्रव्यविशेषवाचिनः शलालुनोऽन्यतरस्यां ष्ठन् स्यात् पक्षे ठक् शलालुकः शालालुकः शलालुकी शालालुकी श
लालु सुगन्धिद्रव्यविशेषः शिल्पं मृदङ्गवादनं शिल्पमस्य मार्दङ्गिकः मड्डुकझर्झरादणन्यतरस्यां मड्डुकवा
दनं शिल्पमस्य माड्डुकः माड्डुकिकः झार्झरः झार्झरिकः प्रहरणं तदस्मिन्नेव असिः प्रहरणमस्य आसिकः धा
नुष्कः परश्वधाट्ठञ्च पारश्वधिकः शक्तियष्ट्योरीकक् शाक्तीकः याष्टीकः अस्तिनास्तिदिष्टं मतिः तदस्येत्येव
अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः नास्तीति मतिर्यस्य स नास्तिकः दिष्टं मतिर्यस्य स दैष्टिकः शीलं अपू
पभक्षणं शीलमस्य आपूपिकः छत्रादिभ्यो णः छत्रादीनामावरणाच्छत्रं तत्शीलमस्य छात्रः कर्मणा
च्छील्ये कार्मः इति ताच्छील्ये णो टिलोपो निपात्यते कर्मशीलः कार्मः नस्तद्धित इत्येव सिद्धे णकार्यं ताच्छीलि

ने॰ केणापि तेनचौरीतापसीत्यादि सिद्धं तात्स्थील्यर्कि कार्मणः कर्माध्ययने वृत्तं प्रथमान्तात्षष्ठ्यर्थे ठक् स्यात् अध्ययने
वृत्ता या क्रिया सा चेत्प्रथमान्तस्यार्थः एकान्यिकः यस्याध्ययने वृत्तमपरीक्षाकाले विपरीतोच्चारणरूपं स्खलि
सि॰ कौ॰ तमेकं जातं सः बह्वच्पूर्वपदाट्ठच् प्राग्विषये द्वादशान्यानि कर्माण्यध्ययने वृत्तान्यस्य द्वादशान्यिकः द्वा
१०८ दशापपाठा अस्य जाता इत्यर्थः हितं भक्षाः अग्रभक्षणं हितमस्मै आग्रभक्षिकः तदस्मै दीयते नियुक्तं अग्रभोजनं नि
यतं दीयतेऽस्मै आग्रभोजनिकः श्राणामांसौदनाट्टिठन् श्राणा नियुक्तं दीयतेऽस्मै श्राणिकः श्राणिकी मांसौदन
118 ग्रहणं संघातविगृहीतार्थं मांसौदनिकः ओदनिकः ओदनिकी मांसिकः मांसिकी भक्तादणन्यतरस्यां एते
वकं भक्तमस्मै नियुक्तं दीयते भाक्तः भाक्तिकः तत्र नियुक्तः आकरे नियुक्तः आकरिकः अगारान्ताट्ठन् देवागारे
नियुक्तो देवागारिकः अध्यायिन्यदेशकालात् निषिद्धदेशकालवाचकाट्ठक् स्यात् अध्यायिनि श्मशानेऽधीते
श्माशानिकः चतुर्दश्यामधीते चातुर्दशिकः कठिनान्तप्रस्तारसंस्थानेषु व्यवहरति तत्रेत्येव वंशकठिने व्यवह
रति वांशकठिनिकः वंशा वेणवः कठिना यस्मिन्देशे स वंशकठिनः कस्मिन्देशे या क्रिया यथानुष्ठेया तां त
थैवानुतिष्ठतीत्यर्थः प्रास्तारिकः सांस्थानिकः निकटे वसति नैकटिको भिक्षुः आवसथात्ष्ठल् आवसथे
नवसति आवसथिकः षित्वान्ङीष् आवसथिकी आकर्षात्पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च आवसथात्किस
रादेः षितः षडेते ठगधिकारे षडितिस्त्रेव णविहिता इत्यर्थः प्रत्ययास्तस्य स्त्रीः ठकावधिः समाप्तः स्त्रीः ॥
प्राग्घिताद्यत् तस्मै हितमित्यतः प्राक् यदधिक्रियते तद्वहति रथयुगप्रासङ्गं रथं वहति रथ्यः युग्यः वत्सानां दम
प्रा॰ तव ह नकाले स्कन्धे काष्ठमासज्यते स प्रासङ्गः धुरो यड्ढकौ हलि चेति दीर्घे प्राप्ते नभकुर्छुरां इत्यकारोत्तरस्य प्रासङ्ग्यः
तिश्ना॰ २ धुरो यद्यत धायादी॰ नस्यात् धुर्यः धौरेयः खः सर्वधुरात् सर्वधुरं वहति सर्वधुरीणः एकधुराल्लुक् च एकधु

आकर्षात्ष्ठल् १ पर्पादिभ्यः ष्ठन् २ भस्त्रादिभ्यः ष्ठन् ३ कुसीददशैकादशात्ष्ठन्ष्ठचौ प्रत्ययद्वयं ४।५।। आवसथात्ष्ठल् ६ किसरादिभ्यः ष्ठन् ७–८

१८

गणोल्ह्या१४

रीणः एकधुरः शाकटाद्या शाकटं वहति शाकटो गौः हलसीराट्ठक् हलं वहति हालिकः सीरं वहति सैरिकः सं
ज्ञायां जन्या जनी वधूः तां वहति प्रापयति जन्या विध्यत्यधनुषा द्वितीयान्ताद्विध्यतीत्यर्थे यत्स्यान्न चेत्तद्ध
नुः करणं पादौ विध्यति पद्याः शर्कराः अधनुषा किं पादौ विध्यति धनुषा धनगणं लब्धा तस्मै ते मतततु धनं ल
ब्धा धन्यः गण्यः अन्नाण्णः अन्नं लब्धा आन्नः वशं गतः वश्यः पदमस्मिन्दृश्यम् पद्यः कर्दमः
नातिशुष्क इत्यर्थः मूलमस्यावर्हि आवर्हणमावर्हः उत्पाटनं तदस्यास्तीत्यावर्हिः मूलमावर्हयन्ति मूल्या
मुद्गाः संज्ञायां धेनुष्या धेनुष्या इत्यस्य गोगमौ यत्प्रत्ययस्त्वार्थे निपात्यते संज्ञायां धेनुष्या बन्धके स्थिता गृहपति
ना संयुक्ते ञ्यः गृहपतिर्यजमानः तेन संयुक्तो गार्हपत्योऽग्निः नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्य
तुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु नावा तार्यं नाव्यं वयसा तुल्यो वयस्यः धर्मेण प्राप्यं धर्म्यं विषेण वध्यो
विष्यः मूलेन आनाम्यं मूल्यं मूलेन समो मूल्यः सीतया समितं सीत्यं क्षेत्रं तुलया संमितं तुल्यं धर्मपथ्यर्थन्यायाद
दनपेते धर्मादनपेतं धर्म्यं पथ्यं अर्थ्यं न्याय्यं छन्दसो निर्मिते छन्दसा निर्मितं छान्दसं इच्छया कृतमित्यर्थः उरसो
ऽण्च चाद्यत् अस्मान्निमित्ते पुत्रः औरसः उरस्यः हृदयस्य प्रियः हृद्यो देशः हृदयस्य हृल्लेखयदण्लासेषु
ति हृदादेशः बन्धने चर्षौ हृदयशब्दात्स्थिता बन्धनेऽर्थे यत्स्याद्धृदादेशश्च हृदयस्य बन्धनो हृद्यः वशीकरणमन्त्रः
मतजनहलात्करणजल्पकर्षेषु मतं ज्ञानं तस्य करणं भावः साधनं वा मत्यं जनस्य जल्पो जन्यः हलस्य कर्षो हल्यः त
त्र साधुः अग्र्यः सामसु साधुः सामन्यः ये चाभावकर्मणोरिति प्रकृतिभावः कर्मण्यः शरण्यः प्रतिजनादिभ्यः ख
ञ् प्रतिजनसाधुः प्रातिजनीनः सांयुगीनः सार्वजनीनः वैश्वजनीनः भक्ताण्णः भक्ते साधवो भाक्ताः शालयः

परिषदो ण्यः पारिषद्यः परिषदः कृतियोगविभागात् ण्योऽपि पारिषदः कथादिभ्यष्ठक् कथायां साधुः काथिकः गुडा
दिभ्यष्ठञ् गुडे साधुः गौडिकः इक्षुः साक्तुकः यवः पथ्यतिथिवसतिस्वपतेर्ढञ् पथि साधु पाथेयं आतिथे
यः वसनं वसतिः तत्र साधुः वासतेयी रात्रिः स्वापतेयं धनं सभाया यः सभ्यः समानतीर्थे वासी साधुरिति नि
वृत्तौ वसतीति वासी समानतीर्थे वसतीति सतीर्थ्यः समानोदरे शयित ओ चोदात्तः समाने उदरे शयितः स्थितः समा
109 नोदर्यो भ्राता सोदराद्यः सोदर्यः अर्थ प्राग्वतः श्री प्राग्वतीयाः समाप्ताः श्री प्राक्क्रीताच्छः तेन क्रीतमित्यतः
प्राक् छोऽधिक्रियते उगवादिभ्यो यत् प्राक्क्रीतादित्येव उवर्णान्ताद्गवादिभ्यश्च यत् छस्यापवादः नाभि नभं च न
भ्योऽन्तः नभ्यमञ्जनं रथनाभावेवेदं शुनः संप्रसारणं वा च दीर्घत्वं च शून्यं शुनं ऊधसोऽनङ् ऊधन्यः कंबलाच्च संज्ञायां य
त्स्यात् कंबल्यमूर्णापलशतं संज्ञायां किं कंबलीया ऊर्णा विभाषा हविरपूपादिभ्यः आमिक्षीयं दधि आमिक्ष्यं पुरो
डाशीयास्तण्डुलाः पुरोडाश्याः अपूप्यं अपूपीयं तस्मै हितं वत्सेभ्यो हितो वत्सीयो गोधुक् शंकव्यं दारु गव्यं हविष्यं
शरीरावयवाद्यत् दन्त्यं कण्ठ्यं नस्यं नाभ्यं ये च तद्धिते यादौ तद्धिते परे शिरःशब्दस्य शीर्षन्नादेशः स्यात् शीर्षण्यः त
द्धिते किं शिर इच्छति शिरस्यति वा केशेषु शीर्षण्याः शिरस्याः केशाः अचि शीर्षः इति वाच्यं अजादौ तद्धिते शिरसः
शीर्षादेशः स्थूलशिरसः इदं स्थौलशीर्षं खलयवमाषतिलवृषब्रह्मणश्च खलाय हितं खल्यं यव्यं माष्यं तिल्यं
वृष्ण्यं ब्रह्मण्यं चाद्व्या अजाविभ्यां थ्यन् अजथ्या यूथिः अविथ्या आत्मन्विश्वजनभोगोत्तरपदात्खः आत्माध्वानौ खे ए
तौ खे प्रकृत्या स्तः आत्मने हितं आत्मनीनं विश्वजनीनं कर्मधारयादेवेष्यते षष्ठीतत्पुरुषाद्बहुव्रीहेश्च छ एव विश्व
जनीयं पंचजनादुपसंख्यानं पंचजनीनं सर्वजनाट्ठञ् खश्च सार्वजनिकः सर्वजनीनः महाजनाट्ठञ् माहाजनि

कः मातृभोगीणः पितृभोगीणः राजभोगीनः आचार्यादणत्वं च आचार्यभोगीनः सर्वपुरुषाभ्यां णढञौ सर्वाण्णो वेति
वक्तव्ये सर्वस्मै हितं सार्वं सर्वीयं पुरुषाद्वधविकारसमूहतेनकृतेषु भाष्यकारप्रयोगात्तेनेत्यस्य द्वंद्वमध्ये निवेशः पुरुष
स्य वधः पौरुषेयः तस्येदमित्यणि प्राप्ते पुरुषस्य विकारः पौरुषेयः प्राणिरजतादिभ्योऽञ् इत्यञि प्राप्ते समूहे पणि प्राप्ते
एकाकिनोऽपि परतः पौरुषेयहतो दृश्यतेऽभावः तेन कृते ग्रन्थे प्राणि प्राप्ते अग्रन्थे प्रासादादौ अप्राप्ते विवेकः
के मार्गावच्छेदकाभावस्य माणवचरकाभ्यां खञ् माणवाय हितं माणवीनं चारकीणं तदर्थं विकृतेः प्रकृतौ विकृतिवाचकाच्चतुर्थ्यन्तात्तदर्था
यां प्रकृतौ वाच्यायां प्रत्ययः स्यात् अङ्गारेभ्य एतानि अङ्गारीयाणि काष्ठानि प्राकारीया इष्टकाः शङ्कव्यं दारु छदिरु
पधिबलेर्ढञ् छादिषेयाणि तृणानि बालेयास्तण्डुलाः उपधिशब्दात्स्वार्थे यत् इष्यते उपधीयते इत्युपधिः रथाङ्गं तदेव
औपधेयं ऋषभोपानहोर्ञ्यः छस्यापवादः आर्षभ्यो वत्सः औपानह्यो मुञ्जः चर्मण्यपि प्रत्ययमेवष्टं वैविप्रतिषेधेन आ
पनह्यं चर्मणोऽञ् चर्मणो या विकृतिस्तद्वाचकादञ् स्यात् वर्ध्र्यै इदं वार्ध्रं चार्मं वारत्रं चर्म तदस्य तदस्मिन् स्यादिति प्राका
रोऽस्मिन् इष्टकानां स्यादिति प्राकारीया इष्टकाः प्रासादीयं दारु प्राकारोऽस्मिन् स्यात् प्राकारीयो देशः इतिशब्दो लौकि
कीं विवक्षामनुसारयति तेनेह न प्रासाद एवं दमस्य स्यादिति परिखाया ढञ् पारिखेयी भूमिः। ।छयतोः पूर्णोऽवधिः। श्री
प्राग्वतेष्ठञ् तेन तुल्यमिति वतिं वक्ष्यति ततः प्राक् ठञ् अधिक्रियते आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् तदर्हतीति तेन तै
र्न्क्रीतमिति यावत्स्वर्थेषु दश ... वर्तते निष्कादिभ्यः समासे ठक् स्यात् आर्हीयेष्वर्थेषु नैष्किकं समासे तु ठञ् परि
माणान्तस्य संज्ञाशाणयोः उत्तरपदवृद्धिः स्यात् द्विनैष्किकं परमनैष्किकं असमासग्रहणं ज्ञापकं सर्वतोऽस्य ततः प्राक् तदन्तवि
धिरिति तेन सगव्ययवापूर्वमित्यादि। इत ऊर्ध्वं तत्समासान्तं पदानां तदन्तग्रहणं प्राग्वतीयेष्वर्थेषु ते न त्वाल्लौकिष

ते·
सि·कौ·
१२·

रायणिकः द्वैपारायणिकः अलुकीति किं द्वाभ्यां सूर्पाभ्यां क्रीतं द्विसूर्पं द्विसूर्पेण क्रीतं शूर्पादञन्यतरस्याम् किंतुकत्र द्विशौ
र्पिकं अर्द्धपरिमाणस्य वसनं वा अर्द्धात्परिमाणवाचकस्योत्तरपदस्यादेरचो वृद्धिः पूर्वपदस्य तु वा विभाषिकीतिव
अर्द्धद्रोणेन क्रीतमर्द्धद्रौणिकं आर्द्धद्रौणिकं नातः परस्य अर्द्धात्परस्य परिमाणकारस्य ह्रोऽिनेस्याद्ध्वं पदस्य तु वा विद
रौ अर्द्धप्रस्थिकं आर्द्धप्रास्थिकं अतः किं आर्द्धकौडविकं तपरः किं अर्द्धखारीभवा अर्द्धखारी अर्द्धखारीभा यद्यत्र वृद्धिनिमित्तस्य
तिषेधस्तद्भावनिषेधनस्यात् शताच्च ठन्यतावशते शतेन क्रीतं शतिकं शत्यं अशते किं शतपरिमाणमस्य शतकं संघः इह
प्रत्ययार्थो वस्तुतः प्रकृत्यर्थोन्नाभिधीयते तेन तदन्यत्वेन कितकनेव असमासइत्येव द्विशतेन क्रीतं द्विशतकं संख्याया अतिश
दन्तायाः कन् संख्यायाः कन्स्यात् आर्हीयेऽर्थे न तत्येत शदन्तायाः पंचभिः क्रीतः पंचकः बहुकः गणकः साप्ततिकः शदन्ता
याः चात्वारिंशत्कः वतोरिड्वा वतन्तात्कन् उड्वास्यात् तावतिकः तावत्कः विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायां योगविभागः कर्तव्यः
आभ्यां कन्स्यात् असंज्ञायामिति तु ... ठञोपवादः विंशकः त्रिंशकः संज्ञायां तु विंशतिकः ॥ त्रिंशत्कः कंसाट्टिठन् टोऽि
वर्थः इकार उच्चारणार्थः नकारः स्वरार्थः कंसिकः कंसिकी अर्द्धाच्चेति वक्तव्यं आर्द्धिकः अर्द्धिकः कार्षापणाट्टिठन्
वक्तव्यः प्रतिरादेशश्च कार्षापणिकः कार्षापणिकः प्रतिकः प्रतिकी शूर्पादञन्यतरस्यां शौर्पं शौर्पिकः शतमान
विंशतिकसहस्रवसनादण् एभ्योऽण्स्यात् ठञोऽपवादः शतमानेन क्रीतं शातमानं वैंशतिकं साहस्रं वासनं
अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायां अध्यर्द्धपूर्वाद्द्विगोश्च परस्याहीयस्य लुक् स्यात् अध्यर्द्धकंसं द्विकंसं संज्ञायां तु पाञ्चलोहि
कं विभाषा कार्षापणसहस्राभ्यां लुग्वा स्यात् अध्यर्द्धकार्षापणं अध्यर्द्धकार्षापणिकं द्विकार्षापणिकं द्विकार्षापणं आपरिमाणाभ्यां ति
कस्य ठञ्चेट्ठनोर्लुक् पक्षे अध्यर्द्धप्रतिकं द्विप्रतिकं अध्यर्द्धसहस्रं अध्यर्द्धसाहस्रं द्विविंशतिवर्णिकात् लुग्वा स्यात् द्विनि १२·

१४०

से॰
सि॰कौ॰
१२८

रयोः समासवद्भावात् नच द्विर्वचमेव वृत्तिः यां यां प्रियां प्रेक्षते कातराक्षी सा सा ह्रियानम्रमुखी बभूवेत्यादावतिप्रसंगात् अन्योन्यमि
तरेतरमित्यत्र चादपूतरादिभ्य इत्यदड्प्राप्तः अन्योन्यसंसक्तमहस्त्रियाम अन्योन्याश्रयः परस्परात्तिसादृश्यमदृष्टपारस्परौ रित्या
दौ सोर्लुक्प्राप्तः सर्वत्राऽलुकेन समासत्वं प्रकृतवार्त्तिकभाष्योदाहरणानि स्त्रियामिति त्वत्र अन्योन्यसंश्रयं त्वेतदपि भाष्यवचा
त्प्रमाणमिति अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् प्रियप्रियेण ददाति प्रियेण वा सुखसुखेन वा द्विर्वचने कर्मधारयवद्भावात्सुप्
लुकि पुनस्तद्वदेव वचनं अप्रतिप्रियमपि वस्तु नायासेन ददातीत्यर्थः यथास्वे यथायथम् यथास्वमिति वीप्सायामव्ययीभावः
पायं आत्मवचनात्मीयतत् यथास्वं तस्मिन्यथा शब्दस्य द्वेल्लीवत्वं च निपात्यते येथायथं ज्ञाता यथास्वभाव मित्यर्थः यथात्मीय
मितिवा द्वंद्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु द्विशब्दस्य द्विर्वचनेऽपूर्वपदस्याम्भावो त्वं चोत्तरपदस्य न
सकत्वं च निपात्यते एवं विषयेषु तत्र रहस्यं द्वंद्वशब्दस्य वाच्यं इतरे विषयभूताः द्वंद्वं मन्त्रयते रहस्यमित्यर्थः मर्यादास्थि
त्यनतिक्रमः आचतुरं हीमे पशवो द्वंद्वं मिथुनायन्ते मोता पुत्रेण मिथुनं गच्छति पौत्रेण प्रपौत्रेणापीत्यर्थः व्युत्क्रमणं पृथग
वस्थानं द्वंद्वं व्युत्क्रान्ता द्विवर्गसंबंधेन पृथगवस्थिता द्वंद्वं यज्ञपात्राणि प्रयुनक्ति द्वंद्वं संकर्षणवासुदेवौ अभिव्यक्तौ साहचर्ये
णेत्यर्थः ॥ योगविभागादन्यत्रापि द्वंद्वं इष्यते ॥ इति द्विरुक्तप्रक्रिया ॥ श्री ॥ ॐ नमः शिवाय शिवाय
इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यां पूर्वार्द्धं समाप्तम् ॐ श्री ॥ संवत् १८८० फाल्गुनवदिपक्षाद्दशम्यां रविवासरे

१२४ ५२

सिद्धांतकौमुदीप्रबोधीयम्ममटशर्म्मणालिखितः

१२७

